यो.सू.
१

ॐस्वस्तिश्रीगणेशायनमः वंदेक्लेशाद्यसंस्पृष्टंपुराणपुरुषंहरिं प्रकृत्यासाक्षितयाजुष्टंयोगेशंयोगशालिनम् १
पतंजलिंसूत्रकृतंप्रणम्यव्यासंमुनिंभाष्यकृतंचभक्त्या भाष्यानुगांयोगमणिप्रभाख्यांवृत्तिंविधास्यामि
यथामतीद्धां २ इहखलुभगवान्पतंजलिःप्रेक्षावत्प्रवृत्त्यंगंशास्त्रप्रतिपाद्यंदर्शयति अथयोगानुशास
नम् १ अत्राथशब्दआरंभार्थः योगशास्त्रमारभ्यतइत्यर्थः यद्यपिहिरण्यगर्भेणशास्त्रंकृतंतथापितत्
द्विस्तृतमितिमत्वातदनुसृतंशास्त्रमारभ्यतइतिद्योतयति अनुशासनमिति अत्रसूत्रेयोगःशास्त्रप्रति
पाद्यउक्तः अर्थात्तज्जिज्ञासुरधिकारी फलंतुयोगस्यकैवल्यमथायोगंतेषांसंबंधइत्यनुबंधचतुष्टयंद्रष्टव्यं
तत्रयोगोद्विविधःसंप्रज्ञातोसंप्रज्ञातश्चेति सचचित्तस्यधर्मः वृत्तीनांचित्तधर्मत्वेनतन्निरोधरूपयो
गस्यापितद्धर्मत्वात् तस्यचित्तस्यपंचभूमयःक्षिप्तंमूढंविक्षिप्तमेकाग्रंनिरुद्धमिति रजसास्थेनचलंक्षिप्तं एम
दैत्यानां तमसानिद्रादिमन्मूढंरक्षसां क्षिप्ताद्विशिष्टंविक्षिप्तंदेवादीनां असंतचलचित्तस्यकादाचित्कंस्थि
रत्वंविशेषः तत्रक्षिप्तमूढयोर्योगगंधोपिनास्ति विक्षिप्तेतुचित्तेकादाचित्कोयोगःप्रचुरविक्षेपवह्निदग्धोऽप्रति
ष्ठितोनिष्फलोनयोगपक्षेवर्त्ततेएकाग्रेतुसत्वप्रधानेएकविषयस्थितेचित्तेरजस्तमोवृत्तिनिरोधःसात्विकवृ

त्तिविशेषकःसंप्रज्ञातयोगोभवतितेनशब्दानुमानाभ्यांपरोक्षत्वेनज्ञातार्थःसाक्षात्क्रियतेसाक्षात्कारादविद्या
दिक्लेशक्षयः ततःपुण्यपापकर्मणांदाहः ततोऽसंप्रज्ञातोयोगःसात्विकवृत्तेरपिनिरोधःसंस्कारमात्रशेष
निरुद्धंचित्तंभवतितदाहभाष्यकारः यस्त्वेकाग्रेचेतसिसद्भूतमर्थंप्रद्योतयतिक्षिणोतिचक्लेशान्कर्मबं
धनानिश्लथयतिनिरोधमभिमुखंकरोतिससंप्रज्ञातोयोगइत्याख्यायतइति १ अधुनाद्विविधस्ययोग
स्यसाधारणंलक्षणमाह योगश्चित्तवृत्तिनिरोधः २ चित्तस्यरजस्तमोवृत्तीनांनिरोधोयोगइत्यर्थः अतः
संप्रज्ञातेसात्विकवृत्तिसत्वेपिनाव्याप्तिः नन्वेकस्यचित्तस्यक्षिप्ताद्यनेकभूमयःकुतइतिचेत् चित्तस्यत्रिगु
णात्मकत्वादितिब्रूमः चित्तंहिज्ञानसुखादिशीलत्वात्प्रवृत्तिगुणादिमत्त्वादालस्यदैन्यादिमत्त्वाच्चसत्वरजस्तमो
गुणात्मकंभवति तत्रसत्वात्किंचिन्न्यूनेरजस्तमसीमिथःसमेयदाभवतःतदासत्वात् ततध्यानाभिमुखीभूत्वातमः
सात्तसिप्रधानेसति रजसैश्वर्यकामयमानविषयप्रियंभवतिविक्षिप्तं यदातुतमःप्रधानंचित्तंमूढंतदाऽधर्मा
ज्ञानावैराग्यानैश्वर्यमुपगच्छति अज्ञानमत्रभ्रमोनिद्राचरजःप्रधानंतुक्षिप्तं इदंक्षिप्तमूढंसर्वसाधार
णंभवतः विक्षिप्तंतुप्रथमयोगिनःसन्निहितत्वादयोगिनःप्रथमकल्पिकामधुभूमिकःप्रज्ञाज्योतिरतिक्रांत

भावनीयश्चेति तेषां लक्षणमनुवक्ष्यते यदि पुनः सत्वप्रधानं चित्तं वितमस्कं सरजस्कं भवति तदैकाग्र्यं संप्रज्ञा
तयोगसिद्ध्योर्मध्ये मयोगिनोऽभिमते धर्मज्ञानवैराग्यैश्वर्येषु वर्त्तत इति यदा तु विधुतरजस्तमोमलं शुद्धसत्वं चि
त्तं तदा सान्नीति चेत् कस्मात् इति कृत्वा पुरुषमात्रध्यानं धर्ममेघाख्यं करोति तत्परं प्रसंख्यानमित्याचक्षते ध्यायिनः ध्या
नेनाचितिशक्तिरपरिणामिन्यप्रतिसंक्रमादर्शितविषया शुद्धा चानंता चेति निश्चिन्वन् सत्वगुणविकृतौ विवे
कख्यातावपि विरक्तं सच्चित्तं तामनिरुध्य संस्कारमात्रशेषं भवति चतुर्थस्य योगिनः सोऽयमसंप्रज्ञातसमाधिः अ
चरितं किं स्थितायत इत्यत्राह चितिशक्तिरित्याद्यनंता चेत्यंतं भाष्यं तत्र अप्रतिसंक्रमेत्यस्य बिले सर्पवद्बुद्ध्यादौ
प्रविश्य न संचरतीत्यर्थः बुद्ध्यादर्शिता विषया यस्याः सा दर्शितविषया सुखदुःखमोहरूपाशुद्धेत्यर्थः २ ननु
द्विवृत्तिस्वभावस्य पुरुषस्य वृत्तिनिरोधे कथं स्थितिरित्यत आह तदा द्रष्टुः स्वरूपेऽवस्थानं ३ यदा चित्तस्य शांत
घोरमूढानां सर्वासां वृत्तीनां निरोधस्तदा द्रष्टुश्चिदात्मनः स्वाभाविके रूपे स्थितिः कुसुमाद्युपाध्यपाये स्फटिकस्येव २८
त्यर्थः पुरुषस्य चेतनमात्रे स्वभावेन वृत्तपर्युतिभावः ३ ननु तर्हि व्युत्थाने पुरुषस्य स्वभावात्प्रच्युतिः स्यादित्याशंक्या
ह वृत्तिसारूप्यमितरत्र ४ इतरत्र निरोधाद्व्युत्थानदशायां चित्तस्य वृत्तयः शांताघोरास्तत्सारूप्यं वृत्तिमद्द्रष्टुरविवेकात्स्व

रूपस्य शांतो दुःखी मूढोऽस्मीति तादात्म्यभ्रम इत्यर्थः अतो न स्वभावात्प्रच्युतिः नहि लोहित्यभ्रमकाले स्फटिक
स्य श्वेतस्वभावात्प्रच्युतिरस्तीति भावः निरोधे मुक्तिर्व्युत्थाने बंध इति सूत्रद्वयतात्पर्यम् ४ इदानीं निरोद्धव्यानां वृ
त्तीनां संख्यामाह वृत्तयः पंचतय्यः क्लिष्टाक्लिष्टाः ५ राजवार्त्तिके चित्तवृत्तिनिरोधान्याख्यानुकार्येण स्व
त्रकारणस्वरूपेण यस्य निरोधव्युत्थानयोर्मुक्तिबंधौ तत्त्रिवृत्तमिति व्याख्याय वृत्तय इत्यादिना तु तां व्याख्या
य अभ्यासवैराग्याभ्यामित्यादिनोपायदर्शनेन निरोधो व्याख्यात इति विशेष उक्तः अवयवार्थस्तु यथा वृत्ति
शब्दो वृत्तिसामान्यपरः चैत्रमैत्रादिचित्तभेदेन वृत्तिसामान्यानां बहुत्वाद्वृत्तय इति बहुवचनम् अभिमतस्व
ज्ञातकाः प्रमाणादयः पंचविशेषा वृत्तिसामान्यस्यावयवा इत्यर्थः पंचावयवा यासां ताः पंचतय्यः तासां द्वा
नोपादानत्रिरूपभेदमाह क्लिष्टाक्लिष्टा इति रागद्वेषादिक्लेशानां हेतवः क्लिष्टाः बंधफलाः सर्वो हि जंतुः
प्रमाणादिवृत्तिमित्तोत्तेष्वर्थेषु रागादिना कर्म कृत्वा सुखादिना बध्यते अक्लिष्टाः क्लेशनाशिन्यो मुक्तिफलाः
सत्वपुरुषान्यताख्यातिरूपाः ताः स्वल्पाभ्यासवैराग्याभ्यां क्लिष्टवृत्तिप्रवाहमध्ये जायमानाः स्वजन्याक्लिष्टसंस्कारैः पु
नः पुनरभ्यासेन परिवृद्धैः क्लिष्टसंस्कारनिरोधेन क्लिष्टवृत्तिप्रवाहं निरुध्य परवैराग्ये स्वयं निरुध्यंते ततः संस्का

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

यो॰ सू॰ ३

रशेषस्य चित्तस्य प्रलयो मुक्तिर्भवतीति भावः ५ पंचवृत्तीरुद्दिशति प्रमाणविपर्ययविकल्पनिद्रास्मृतयः ६ २। नोक्तावृत्तीनामुद्देशमात्रस्य फलम् ६ तत्र प्रमाणवृत्तिं विभजते प्रत्यक्षानुमानागमाः प्रमाणानि ७ त्रीण्येव प्रमाणानीति भावः अत्र प्रमाकरणत्वं प्रमाणसामान्यलक्षणं प्रमा चाज्ञातार्थविषयग्राहिणी एषैवाबाधाहतौ प्रतिविबतत्करणं वृत्तिः तत्रेन्द्रियसंबन्धद्वारा चित्तस्य घटादिसंबंधे सति सामान्यविशेषात्मकेऽर्थे व्यक्तिरूपविशेषनिरूपणप्रधाना वृत्तिः प्रत्यक्षप्रमाणं तत्रार्थाकारायां वृत्तौ चिदात्मनोऽयं प्रतिबिंबः सोऽपि वृत्तिरूप अर्थाकारः सन् फलं भवति एवं सामान्यतो ज्ञाते पक्षे साध्यसमाधिना विद्यमानविशेषवृत्तिः प्रत्यक्षप्रमाणमिति ज्ञेयं अनुमानागमयोश्च अभिसंगतिग्रहापेक्षत्वात् वह्नित्वादिसामान्येन रूढात् सामान्यविषयत्वमेव तत्र व्याप्तिग्रहे सति पक्षे वृत्तिलिंगज्ञानात् साध्यज्ञानवह्न्यादिरूपसामान्यनिर्धारणवृत्तिरनुमानं आप्तेन दृष्टोऽनुमितो वा योऽर्थः तेन शब्देनोपदिश्यते तस्माच्छब्दात् श्रोतुस्तदर्थविषया वृत्तिरागमः वेदस्याप्तप्रमाणत्वं बस्मते ७ विपर्ययं लक्षयति विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम् ८ तद्रूपेऽस्वविषये प्रतिष्ठाम्प्रबाधविरोधात्तिष्ठति यावत् विकल्पोऽप्यतद्रूपप्रतिष्ठः सति व्याप्तिनिरासाय मिथ्याज्ञानपदं तेन स्वविषयेऽवमम राम॰ ३

व्यवहारोऽपि सर्वसंमतत्वाधवत्वमुच्यते न च विकल्पे तादृशो बाधोऽस्ति केषांचिद्विस्मारितत्वानां तु अबाधत्वेऽपि यथापूर्वं व्यवहाराल्लोपात् स प्रायस्तु लक्ष्य एवेति नातिव्याप्तिरिति भावः अस्यैव विपर्ययस्य भेदाः पंचक्लेशा इति वक्ष्यते ८ विकल्पं लक्षयति शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः ९ नरशृंगादिशब्दश्रवणानंतरमेव यपभवस्यैव निर्विषया वृत्तिर्या स विकल्प इत्यर्थः अयं विकल्पो वस्तुशून्यत्वान्न प्रमाणं बाधस्यावश्यंभावित्वात् व्यवहारानुवृत्तत्वाच्च न विपर्ययः यथा चैतन्यमेव पुरुषस्य स्वरूपमिति भेदनिश्चयेऽपि पुरुषस्य चैतन्यमिति भेदविकल्पः भावानिरोधेऽपि अभावो नास्तीति निषेधेऽपि सर्वधर्माभाववान् पुरुष इति विशेषणविशेष्यभावविकल्पः एवं राहोः शिर इत्यादिविकल्पा उदाहार्याः ९ निद्रां लक्षयति अभावप्रत्ययालंबना वृत्तिर्निद्रा १० कार्यप्रत्ययते। गच्छतीति प्रत्ययो हेतुः जाग्रत्स्वप्नवृत्त्योरभावे हेतुस्तमः आलंबनं विषयो यस्याः सा वृत्तिर्निद्रावृत्तिः परस्य। तु वर्तमानस्यावारणज्ञानाभावो निद्रेति मतनिरासार्थं तथा हि उत्थितस्य सुखमहमस्वाप्समिति स्मरणं बुद्धिसत्त्वप्रचिततमोविषयं तदनुभवं कल्पयति दुःखमहमस्वाप्समिति स्मरणं रजस्तमोविषयं तदनुभवं गाढमहमस्वाप्समिति केवलतमोविषयं स्मरणं तदनुभवं कल्पयति सा चानुभवो वृद्धिधर्मोऽनिद्रा सा चैकाग्रत्वक्षि

यो·सू·
४

स्याधितामसत्वाद्योगार्थिना निरोद्धव्येतिभावः १० स्मृतिंलक्षयति अनुभूतविषयासंप्रमोषःस्मृतिः ११ प्रमा
णानुभवोपिस्मृतेः पितानस्यविषयः स्मृतेरात्मीयो नो किंपितुः स्वमिवपुत्रस्यस्मृतेर्मूलानुभवोविषयस्तुपरस्वंतेन
द्रूहः संप्रमोषःस्तेयः तथाचानुभूतेविषयेयोयमसंप्रमोषः अधिकाग्रहः अनुभूतमात्रग्रहइतियावत्सास्मृ
तिः समर्थः वृत्तिस्य·योरूपबोधोऽनुभवः·स्वप्रकाशइतितन्नस्वसंस्कारादनुभवविषयविषयास्मृतिर्भवति न
नुस्वकार्यगजवैशिष्ट्यमननुभूतमपिस्वप्नेस्मर्यते इतिचेन्नतस्यविपर्ययत्वादितिभावः ११ आसांवृत्ती
नांनिरोधोपायमाह अभ्यासवैराग्याभ्यांतन्निरोधः १२ सर्वेस्यजंतोःस्वभावतश्चित्तवृत्तिनदीविषयभूमिगासं
सारसागराभिमुखीप्रवहतितत्रविषयेवैराग्येणतत्प्रवाहंमंत्कासत्वपुरुषविवेकाभ्यासेनतस्यानद्याःप्रत्यक्
प्रवाहःक्रियते अनभ्यासेक्लिष्टविक्षेपस्वभावस्यचित्तस्यवैराग्याद्विक्षेपभंगेनिद्रापत्तेस्तस्मादभ्यासवैराग्य
लयविक्षेपनिवृत्तिरूपप्रयोजनभेदेननिरोधकार्येसमुच्चीयते १२ अभ्यासस्वरूपमाह तत्रस्थितौयत्नोऽभ्या
सः १३ तत्रतयोर्मध्येस्वतस्तमात्रवृत्तिरूपस्यचित्तस्यैकाग्रतास्थितिःतस्याःकार्यायांयानिसाधनानियमनिय
मादीनितद्विषयःप्रयत्नस्तदनुष्ठानमभ्यासरूपः १३ नन्वनादिकालजनितजन्मसत्तामसवृत्तिसंस्कारैर्विरोधिभिःकं

राम
४

द्धितोऽभ्यासेनस्थिरीक्रियतइत्यतआह सतुदीर्घकालनैरंतर्यसत्कारासेवितोदृढभूमिः १४ तुशब्दःशंकानि
रासार्थः सोऽभ्यासोदीर्घकालंतपोब्रह्मचर्यविद्याश्रद्धारूपसत्कारेणनैरंतर्येणासेवितोदृढसंस्कारःसन्व्यु
त्थानसंस्कारैर्नाभिभूयते किंतुस्थितिसमर्थोभवतीत्यर्थः अप्यांतरेणतपसाब्रह्मचर्येणश्रद्धाविद्या
त्मानमविष्मतिश्रुतिःसत्कारदर्शयति १४ वैराग्यस्वरूपमाह दृष्टानुश्रविकविषयवितृष्णस्यवशीकार
संज्ञावैराग्यम् १५ यतमानव्यतिरेकैकेंद्रियवशीकारसंज्ञाश्चतस्रः तत्ररागादीनांचित्तस्थानांकषायाणां
विषयेष्विंद्रियप्रवर्त्तकानांपाकायप्रयत्नोयतमानसंज्ञावैराग्यंततःपक्वानांकेषांचित्कषायाणांपच्य
मानेभ्योविभागावधारणाव्यतिरेकसंज्ञावैराग्यंततःपक्वानांसर्वेषामिंद्रियप्रवर्त्तनाशक्तानांमनस्यौ
त्सुक्यरूपेणावस्थानमेकेंद्रियसंज्ञावैराग्यंदृष्टोन्नपानस्त्र्यादिषुदृष्टेषु गुरूच्चारणमनुश्रवः अनयांपि
सोनुश्रवोवेदः तदुक्तेष्वानुश्रविकेषुस्वर्गादिदिव्यादिविषयेषुविनाशपरिणामसातिशयत्वासूयादि
दोषदर्शनमभ्यासेनसाक्षात्काराद्विरक्तस्योपेक्षाबुद्धिर्वशीकारसंज्ञावैराग्यमित्यर्थः १५ अपरंवैराग्य
मुक्त्वापरंवैराग्यमाह तत्परंपुरुषख्यातेर्गुणवैतृष्ण्यम् १६ पूर्ववैराग्यमंतरवैराग्यहेतुःतथाहिवक्ष्यमाण

योगांगानुष्ठानादनतिशुद्धचित्तस्यविषयेषुदोषदर्शनाद्वशीकारसंज्ञकवैराग्येसतिगुणमात्रगतस्यपुरु
षस्यपाख्यातिस्तदभ्यासाद्धर्ममेघाख्यध्यानप्राप्तिस्ततोनिरस्ततमोरजोमलत्वाच्चित्तसत्त्वमात्रशेषमतिप्र
सन्नंभवतिसोयमतिशुद्धचित्तधर्मः प्रसादोधर्ममेघस्योत्तरावधिः तस्मिन्नुत्पन्नेमूलतःपरंगुणेभ्योवैतृष्ण्यंवैरा
ग्यमुच्यते यन्मुक्तिहेतुसाक्षात्कारंवदंतिमोक्षविदः यस्मादयमक्षीणसर्वक्लेशोविधूताशेषकर्मोपायुःकृ
तविवेकख्यातावप्युपेक्षकः कृतकृत्यमात्मप्रापणीयमितिमन्यतेयोगीयदनंतरमेवचित्तमसंप्रज्ञातसंस्का
रमात्रशेषंभवतितत्परंवैराग्यं अपरंतुवैराग्यंवितमस्करजोलेशमलस्यचित्तस्यधर्मः यतःप्रकृतौलीना
ऐश्वर्यमनुभवंति यथोक्तवैराग्यात्प्रकृतिलयइति १६ एवमभ्यासवैराग्येनिरूप्यतत्साध्यंनिरूपयन्ना
दौसंप्रज्ञातंचतुर्विधंदर्शयति वितर्कविचारानंदास्मितारूपानुगमात्संप्रज्ञातः १७ यथालोकेप्राथ
मिकधानुष्कःस्थूलमेवलक्ष्यंविध्यति पश्चात्सूक्ष्मं तथाप्राथमिकोयोगीस्थूलमेवशालग्रामादिकं
ध्यानेनसाक्षात्करोतिसस्थूलसाक्षात्कारोवितर्कः तस्यस्थूलस्यकारणेपंचतन्मात्रादिकंसूक्ष्मंतस्यध्या
नेनसाक्षात्कारोविचारः इंद्रियाणिस्थूलानिप्रकाशकत्वात्सत्त्वरूपाणितेषांध्यानेनसाक्षात्कारआनंदस्त

योकारणबुद्धिःपुरुषेणग्रहीत्रैकीभूतासास्मितातस्याध्यानेनसाक्षात्कारोप्यस्मितोच्यते तत्रस्थूलसू
क्ष्मेचग्राह्यमिंद्रियाणिग्रहणानिअस्मिताच्योग्रहीतातेषुग्रहीतृग्रहणग्राह्येषुध्यानपरिपाकः संप्रज्ञा
तोयोगः सचवितर्कविचारानंदास्मितास्वरूपैश्चतुर्भिरनुगमाच्चतुर्विधः सवितर्कः सविचारः सानंदः सास्मि
तइति अत्रयद्यप्युत्तरोत्तरसूक्ष्मविषयतारतम्यात्तथाप्यस्थूलयोगःस्थूलसूक्ष्मेंद्रियास्मिताविषयकः सस्मायो
गस्तद्विषयकः अस्मोघकविषयाविति विशेषाभावात्क्रमप्रदर्शितः तत्रप्रज्ञानेषुयद्विषयंयथातदुक्त
स्मादियोगाःस्थूलाद्यविषयाइतिमतंमे भोजवृत्तौतुइंद्रियेषुसवितर्कमुक्त्वाहंकारेसानंदमहत्तत्वे
सास्मितारव्यमुक्तं तत्राद्यमितिविषयग्राहकांतःकरणमहंकारः अंतर्मुखसन्मात्रेमहत्तत्त्वेलीनेसत्ता
मात्रावभासकमस्मितेतितयोर्भेदः ग्रहीतापुरुषः १७ अधुनासोपायमसंप्रज्ञातमाह विरामप्रत्ययाभ्या
सपूर्वःसंस्कारशेषोन्यः १८ वृत्तीनामभावोविरामः तस्यप्रत्ययःकारणंपरवैराग्यंतदभ्यासः पूर्वः उपायोय
स्यसतथाअनेनपदेनोपायउक्तः अन्योःसंप्रज्ञातः संस्कारशेषः परंहिवैराग्यमसंप्रज्ञातसंस्कारानप्यभि
भूयस्वसंस्कारशेषयतिसनिर्बीजःसमाधिःनिरालंबनत्वात्कर्मबीजाभावाच्चेत्यर्थः १९ अयमसंप्रज्ञातोद्वि

यो॰सू॰ विधः भवप्रत्ययः उपायप्रत्ययश्च तत्राद्यो मुमुक्षुभिर्हेयः तमाह भवप्रत्ययो विदेहप्रकृतिलयानां १९ भूतेंद्रि
६ याणामन्यतमस्मिन्निकारे: नात्मत्वभावनया देहपातानंतरं भूतेंद्रियेषु लीनाः षाट्कौशिकदेहस्य
भावाद्विदेहाः अव्यक्तमहदहंकारपंचतन्मात्रेषु प्रकृतिष्वात्मत्वभावनया लीनाः प्रकृतिलयाः तेषां चित्तं सं
स्कारमात्रशेषमित्यसंप्रज्ञातः सतु भवप्रत्ययः भवंति जायंते अस्यां जंतव इति भवः अविद्या अनात्मन्यात्म
त्वबुद्धिः स प्रत्ययो हेतुर्यस्य सतथा अविद्यामूलोयं योगोंतवत्फलः यदाह वायुः दशमन्वंतराणीह तिष्ठंती
द्रियचिंतकाः भौतिकास्तु शतंपूर्णं सहस्रंत्वाभिमानिकाः बौद्धादशसहस्राणि तिष्ठंति विगतज्वराः पूर्णंश
तसहस्रंतु तिष्ठंत्यव्यक्तचिंतकाः पुरुषंनिर्गुणंप्राप्य कालसंख्या न विद्यते इति तेषां विवेकख्यातिनास्ति
तेषां चित्तं लीनमप्यापसंसारे पतति सुप्रचित्तवदितिभावः १९ अधुना द्वितीयमुपायमाह श्रद्धावी राम
र्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषां २० पूर्वयोगोचरासात्विकोश्रद्धा तया वीर्यं प्रयत्नो जायते तेन यमनिय ६
माद्यिपरयत्नास्मृतिर्ध्याने तेन समाधिः तेन प्रज्ञा पूर्वयोगोचराभ्यासः अभ्यासः संप्रज्ञातस्ततः परवैराग्याद
संप्रज्ञातः इतरेषां मुमुक्षूणां योगिनां भवति श्रद्धादयः प्रज्ञांता उपायास्तत्कोपायप्रत्ययः तेषां यो

पाः प्राणिनां प्राक्संस्कारवशान्मृदुमध्याधिमात्रभेदात्त्रिविधाः तथा च योगिनस्त्रयो भवंति मृदूपायोम
ध्योपायोधिमात्रोपायश्चेति तत्र मृदूपायः त्रिविधः मृदुसंवेगो मध्यसंवेगस्तीव्रसंवेगश्चेति एवमितरा
वपि त्रिविधौ भवतः एवं च नव योगिनो भवंति तेषां चिरचिरतरं क्षिप्रक्षिप्रतरं सिद्धिर्भवतीति उपायता
रतम्या २० तत्र केषां क्षिप्रतरं सिद्धिरित्यत्राह तीव्रसंवेगानामासन्नः २१ संवेगो वैराग्यं येषां तीव्र उ
पायाश्चाधिमात्रास्तेषां योगिनामासन्नः समाधिरसंप्रज्ञातस्ततो मोक्ष इत्यर्थः २१ मृदुमध्याधिमा
त्रत्वात्ततोपि विशेषः २२ तीव्रस्य संवेगस्यापि मृदुमध्याधिमात्रत्वात्ततो मृदुतीव्रसंवेगस्य योगिन आ
सन्नः समाधेर्मध्यतीव्रसंवेगस्यासन्नतरः अधिमात्रतीव्रसंवेगस्यासन्नतमः समाधिलाभ इति विशे
ष इत्यर्थः २२ ईश्वरप्रणिधानाद्वा २३ ईश्वरे कायिकवाचिकमानसात्प्रणिधानाद्भक्तिविशेषादास
न्नतमः समाधिलाभः वाशब्दः पूर्वोक्तोपायेनास्य भक्त्युपायस्य विकल्पार्थः भक्त्यानयेषत्वादीश्वरोभि
स्याभिमुखः सन्निदमिष्टमस्याभिलषितमनुगृह्णातीति भावः २३ ईश्वरस्वरूपं निरूपयति क्लेशकर्मविपाका
शयैरपरामृष्टः पुरुषविशेष ईश्वरः २४ क्लेशाः अविद्यादयः पंच कर्माणि धर्माधर्मौ तयोः फलं विपाकः फलानु

यो.वृ.
७

कृता संस्काराश्च आशयाः मनस्याशेरत इति आसत्तेः यथा नास्य कदाचिन्ननिकाष्टभोगसंस्काराश्च स्पृशन्ति अ-
न्यथा जीवनासंभवात् क्लेशादिभिश्चित्तस्थैः परामृष्टः सांसारिकः पुरुषश्चित्ताविवेकेन भोक्तृत्वात् तैः
कालत्रयेप्यसंबद्धपुरुषईश्वरः विशेषपदेन कालत्रयासंबंधवाचिना मुक्तजीवेभ्यो व्यावृत्तिः मुक्तानां तेषां
पूर्वकाले बंधत्रयसंबंधात् प्रकृतिलीनानां प्राकृतो बंधः भूतेंद्रियेषु विकारेषु लीनानां विदेहानां वैकारिकः
अन्येषां देवनरादीनां दक्षिणाबंधः चित्ताधीनकर्मफलत्वादिति भेदः ननु ज्ञानक्रियाशक्तिमत्त्वं यामैश्व-
र्यं पुरुषस्यापरिणामिनः कथमित्युच्यते अस्ति ईश्वरस्यानादिसिद्धं शुद्धसत्त्वात्मकं नित्यप्रधानजं निर-
तिशयज्ञानक्रियाशक्तिमत्त्वं हि भगवान्संसारिणां चाज्ञानेनामुद्धरणोद्युपात्तचित्तमयादत्तेन हि ज्ञान
धर्मोपदेशभक्तानुग्रहयोगात् ननु कथं चित्तोपादानात्प्रागिच्छोदेतीति वाच्यम् बीजांकुरवदना-
दित्वात्सर्गप्रलयप्रवाहस्य पूर्वसर्वकार्यस्य प्रलयप्रदाभविष्यत्कल्पे लोकानुग्रहार्थमिदं चित्तमुपा-
देयमिति भगवता संकल्प्यते तत्संकल्पवासितप्रधाने लीने तत्सर्गादौ चित्तमुद्भवति तेनैवेश्वरोनुग-
ह्णातीत्यनवद्यं ननु तादृशचित्तसत्त्वे किं मानमिति चेत्स्वाभाविकी ज्ञानबलक्रिया च एष सर्वेश्वर इत्यादिवेद

एभ
७

वाक्यमिति ब्रूमः वेदा निरतिशयज्ञानशक्तिविशिष्टेश्वरप्रणीतः अतः प्रमाणमिति संक्षेपः २४ एवं वेद
प्रामाण्यात्सिद्धः सर्वज्ञईश्वरः तस्य सर्वज्ञत्वे अनुमानमप्याह तत्र निरतिशयं सर्वज्ञबीजं २५ अस्मदादी-
नां ज्ञानेनानिरतिशयेन ज्ञानेनाविनाभूतं भवितुमर्हति सातिशयत्वात् यत्सातिशयं तत्स्वमानज्ञानीय
न निरतिशयेन युक्तं यथा कुम्भपरिमाणो विभुपरिमाणेन तस्मिन् हि निरतिशयज्ञाने सर्वज्ञत्वबीजं ज्ञाप-
कं यत्र निरतिशयज्ञानं तत्र सर्वज्ञत्वं ज्ञापकमित्यर्थः तस्य सामान्येन सिद्धस्य सर्वज्ञस्य श्रुत्यादिसिद्धाः शिव
विष्णुनारायणमहेश्वरादिसंज्ञाः तथा च वायुपुराणे सर्वज्ञता तृप्तिरनादिबोधः स्वतंत्रता नित्यमलुप्तश-
क्तिः अनंतशक्तिश्च विभोर्विधिज्ञाः षडाहुरंगानि महेश्वरस्य ज्ञानं वैराग्यमैश्वर्यं तपः सत्यं क्षमा धृतिः स्र-
ष्टृत्वमात्मसंबोधो ह्यधिष्ठातृत्वमेव च अव्ययानि दशैतानि नित्यं तिष्ठंति शंकरे इति तथा महाभारते अ-
नादिनिधनं विष्णुं सर्वलोकमहेश्वरं लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेदित्यादि २५ तस्य भगवतो
ब्रह्मादिभ्यो विशेषमाह पूर्वेषामपि गुरुः कालेनानवच्छेदात् २६ पूर्वेषां सर्गादावुत्पन्नानां कालपरिच्छिन्ना-
नां गुरुरीश्वरः कुतः कालेनानवच्छेदात् अनाद्यनंतत्वादित्यर्थः तथा च श्रुतिः यो ब्रह्माणं विदधाति पूर्वं यो वै वे-

ऽश्वप्रहिणोति तस्येश्वरसाद्या २६ एवमीश्वरं निरूप्य तत्प्रणिधानं वक्तुं तस्यार्हस्यसंज्ञामा ह तस्य वाचकः
प्रणवः २७ सुगमं सूत्रं ननु शब्दस्य वाचकत्वं अभिधाख्या शक्तिः शब्दार्थयोः संबंधरत्वमते सा किं संकेते
न क्रियते व्यज्यते वा नाद्यः प्रतिकल्पं स्यात्तेश्वरस्य संकेतभेदेन शब्दार्थाव्यवस्थाप्रसंगात् न द्वितीयः स
प्मादिशब्दानां पुत्रेषु पित्रासंकेतनवैफल्यात् न हि तत्र संकेतव्यंग्या शक्तिरस्ति न वा सति व्यंग्ये व्यंजकमपे
वत् तस्मादिदं संकेतसत्त्वमर्थमिति चेदुच्यते स्थितैव शक्तिः संकेतेन व्यज्यते यथा स्थित एव पितृपुत्रभा
वो ममायं पुत्र इति वाक्येन व्यज्यते तद्वद्गवादिशब्देषु प्रलये प्रधानसाम्यगतेषु सर्गादौ पुनः शब्दास्तदाभ्र
तेषु स्थितामेव तत्र कल्पस्य तत्तदर्थे शक्तिमीश्वरः संकेतेन ज्ञापयति जीवानां लुप्तसंस्कारत्वात् अधुना
तन पित्रादिसंकेतस्तु शक्तेः स्यादेक केचित्तु सर्वशब्दानां सर्वार्थेषु शक्तिरस्तीति पित्रादिसंकेतो नियमज
कः गवादिशब्दानां तु वेदार्थव्यवस्थार्थमीश्वरसंकेतेनार्थविशेषे शक्तिर्नियम्यत इत्याहुः सर्वथापि वैदि
कशब्दार्थसंबंधो व्यवस्थितव्यवहारात्तथा नित्य इति सिद्धम् २७ एवं वाचकमुक्त्वा प्रणिधानमाह तज्जपस्त
दर्थभावनं २८ अस्य भाष्यमेव लिख्यते प्रणवस्य जपः प्रणवाभिधेयस्य चेश्वरस्य भावनं तदस्य योगिनः प्रण

वं जपतः प्रणवार्थं च भावयतः चित्तमेकाग्रं संपद्यते तथा चोक्तं स्वाध्यायाद्योगमासीत योगात्स्वाध्यायमामन
येत् स्वाध्याययोगसंपत्त्या परमात्मा प्रकाशत इति २८ तस्येश्वरप्रणिधानस्यासन्नतमः समाधिलाभः फ
लमिति पूर्वमुक्तं अधुना फलांतरमपि तद्गुणमाह ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च २९ प्र
तीपं विपरीतमंचति जानातीति प्रत्यग् आत्मा इत्यर्थः अनेनेश्वराभेदः उक्तः तुरीयांतरो वा प्रत्यक्स चा
सौ चेतनश्च तस्याधिगमः साक्षात्कारः ततः प्रणिधानाद्भवति अपि चांतरायाणामभावश्च भवति ननु
स्वभिन्नेश्वरप्रणिधानात्स्वसाक्षात्कारः कथं स्यात् अभ्यासतज्ज्ञानयोः पद्मादावेकविषयत्वदर्शना
दिति चेदुच्यते यथैवेश्वरोऽसंगश्चिद्रूपः कूटस्थः क्लेशादिशून्यस्तथैव जीव इति सादृश्यादीश्वरध्या
नेन तदनुग्रहद्वारा जीवस्यापि स्वसाक्षात्कारो हेतुरित्यनवद्यं २९ अंतरायानाह व्याधिस्त्यानसंशयप्रमादा
लस्याविरतिभ्रांतिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेंऽतरायाः ३० ये चित्तं योगाद्वि
क्षिपंति भ्रंशयंति ते चित्तविक्षेपाः योगस्यांतरायाः विघ्ना नवतत्र व्याधिर्वातपित्तश्लेष्मणामन्यतमस्ये
द्रूपो रोग वैषम्यसंस्थानं चित्तस्य लघुत्वेऽपि कर्मानर्हता संशयः प्रसिद्धः योगांगानामनुष्ठानं प्रमादः आलस्य

यो· सू· चित्तस्य गुरुत्वादप्रवृत्तिः अविरतिर्विषयतृष्णा भ्रांतिदर्शनमेककोटिको विपर्ययः अलब्धभूमिकत्वं समा
९ धिभूमेरलाभः मधुमत्यादय समाधिभूमयो वक्ष्यंते अनवस्थितत्वं लब्धायां भूमौ चित्तस्यास्थिरत्वं पूर्व
भूमौ हि स्थिते चित्ते उत्तरभूमिं जयेत् तस्मादस्थिरत्वं दोषइत्यर्थः ३० नकेवलमेते विक्षेपा योगनाशकाः
किंतु दुःखादीन्यपि कुर्वंतीत्याह दुःखदौर्मनस्यांगमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः ३१ दुःखमा
धिजं शारीरं कामादिजं मानसं तद्द्वयमाध्यात्मिकं व्याघ्रादिजमाधिभौतिकं ग्रहपीडादिजमाधिदैवि
कं दौर्मनस्यमिच्छाविघातात्क्षोभो मनसि अंगमेजयत्वं भावोंगमेजयत्वमंगानां कंपनमित्यर्थः अनि
च्छतः प्राणो यद्बाह्यवायुमंतः प्रवेशयति स श्वासः समाध्यंगरेचकविरोधीत्यर्थः एवमनिच्छतः कोष्ठस्य
वायोर्बहिर्गमनं प्रश्वासः पूरकविरोधी एते विक्षेपैः सहभवंति विक्षिप्तचित्तस्य भवंतीत्यर्थः ३१ ईश्वरप्र राम·
णिधानादेतेषामभावइत्युक्तमुपसंहरति तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः ३२ विक्षेपाणां नाशार्थमेक ९
तत्त्वस्येश्वरस्याभ्यासो ध्यानं कार्यमित्यर्थः अत्र भाष्यकारैः स्थापि चित्तस्यानस्यैकाग्रतासंपादनीयेतिस्व।
णिकमतमाशंक्यसाहभिनिप्रत्यभिज्ञानादिना चित्तमेकमनेकार्थविग्राहि स्थायि विद्यते इति साधितम् ३२

तस्य चित्तस्य रागादिमलवत्तो योगानुष्ठानायोगात् तन्मलनिरासोपायमाह मैत्रीकरुणामुदितो
पेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनं ३३ सुखिषु प्राणिषु मैत्रीं मित्र
तां दुःखितेषु करुणां दयां पुण्यवत्सु मुदितां हर्षं अपुण्यशीलेषूपेक्षां माध्यस्थ्यं तत्तिभा
वयेत् तया भावनया चित्तस्य प्रसादनं भवति सुखादिषु यथाक्रममुक्तया भावनया सात्त्विको धर्मो जा
यते तेनोपकारेण रागद्वेषाणां चित्तमलानां नाशात्तेन च शुक्लेन धर्मेण चित्तं प्रसन्नं भवति
प्रसन्ने च वक्ष्यमाणेभ्य उपायेभ्यः एकाग्रस्थितिमद्दलभत इति तात्पर्यं ३३ इदानीं मैत्र्यादिभावनया प्रस
न्नस्य चित्तस्य स्थित्युपायानाह प्रच्छर्दनविधारणाभ्यां वा प्राणस्य ३४ नासिकापुटाभ्यां प्राणस्य प्रच्छर्दनं
रेचनं रेचितस्य प्राणस्य बहिरेव विधारणं यथाशक्तिकृताभ्यां चित्तमेकत्रैतस्य स्थितिं लभते प्राणजये चित्तस्य
जयस्तयोरविभागात्प्राणायामस्य सर्वपापनिवर्त्तकत्वात्पापनिवृत्तौ चित्तं स्थिरं भवति वाशब्दो वक्ष्यमाण
णोपायांतरापेक्षया विकल्पार्थः ननु मैत्र्यादिभावनापेक्षया तद्भावनायाः सर्वोपायसहकारित्वेन समुच्च
यादितिमंतव्यं उ ३४ पायांतरमाह विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबंधनी ३५ नासाग्रे चित्त

यो॰ सू॰
१०

स्यसंयमाद्दिव्यगंधसाक्षात्कारोभवति जिह्वाग्रेसंयमात्दिव्यरससंविद्भवति तालुनिरूपसंवित् जिह्वामध्ये
स्पर्शसंवित् जिह्वामूलेशब्दसंवित् एताःसंविदोगंधादिविषयवत्यः प्रवृत्तयः शीघ्रमुत्पन्नाः सत्योविश्वासमु
त्पादयंतिस्यश्वरागेलक्षणेनमनसः स्थितिंनिबध्नतीत्यर्थः शास्त्रोक्तविशेषस्यकस्यचिदनुभवेसतिसर्वस्मे
पिश्रद्धयासंयमाधेयोगीवर्त्ततेइतिभावः ३५ विशोकावाज्योतिष्मती ३६ अष्टदलंहृत्पद्मंरेचकेनोर्ध्वमुखंकृ
त्वातत्कर्णिकायांऊर्ध्वमुख्यांसुषुम्नाख्यायांनाड्यांसंयमेनमनसः संविद्भवतितन्मनः सूर्येंदुग्रहमणी
नांयाप्रभातद्रूपेणानेकधाभवति तस्माद्विकज्योतिर्मयः तस्यकारणंसात्विकोहंकारोनिस्तरंगमहोद
धिकल्पोस्मापीतस्यापिज्योतिःस्वरूपस्यसंयमात्संविद्भवतिसेयंद्विविधासंवित्ज्योतिष्मतीत्तोहंकार
स्मोनिर्विषयाविशोकाद्युःस्वरूपाप्रवृत्तिरुत्पन्नामनसःस्थितिहेतुरित्यर्थः ३६ वीतरागविषयंवाचि
त्तं ३७ आसशुकादीनांवीतरागपरिचित्तंतद्विषयंतत्रधार्यमाणंयोगिनश्चित्तंस्थितिपदंलभतइत्यर्थः
स्वप्ननिद्राज्ञानालंबनंवा ३८ ज्ञानप्रत्यक्षेतेपरःस्वप्नेभगवतोमूर्तिमस्य तमनोहरामाराधयन्नेवप्रबुद्धः तदे
वचित्तंधारयेत् निद्रायांसमुत्सोयस्तुवेजायते तत्रधारयेतएवंस्वप्ननिद्राज्ञानालंबनंचित्तंस्थितिंलभते य

एम॰
१०

थाभिमतध्यानाद्वा ३९ किंबहुनायदेवेष्टंशिवरामकृष्णादिरूपंतदेवध्यायेत् तत्रलब्धस्थितिकमन्यत्रापिस्थि
तिंलभते अभिमतमनतिक्रम्ययथाभिमतंतत्स्वध्यानादितिविग्रहः तदुचितस्थितिर्जायतइत्यत्रकिंज्ञा
पकमित्यत्राह परमाणुपरममहत्वांतोस्यवशीकारः ४० अस्यचित्तस्यसूक्ष्मेनिविशमानस्यपरमाणवं
तोवशीकारः अप्रतिघातस्तथास्थूलेनिविशमानस्यपरममहत्वाकाशांतोऽप्रतिघातः तेनयोरणवशीका
रेण चित्तंलब्धस्थितिकमितिज्ञात्वास्थित्युपायानुष्ठानाद्युपरमंतइत्यर्थः ४० एवंचित्तस्थितेरुपायाउ
क्ताः ज्ञापकश्चवशीकारउक्तः संप्रतिलब्धस्थितिकस्यचित्तस्यकिंविषयःकिंरूपश्चसंप्रज्ञातोयोगोभवतीत
उत्तरंपठति॥ क्षीणवृत्तेरभिजातस्येवमणेर्ग्रहीतृग्रहणग्राह्येषुतत्स्थतदंजनतासमापत्तिः ४१ यथाभि
जातस्यकुलीनस्यातिस्वच्छस्यमणेःस्फटिकमणेर्जपाकुसुमाद्युपरक्तस्यतद्रूपाभिभवेनतदाकारताभव
तितथाभ्यासवैराग्याभ्यांक्षीणराजसतामसवृत्तिकस्यचित्तस्यमणेःस्थूलसूक्ष्मभूतात्मकग्राह्यग्रहणेंद्रियरूपे
ग्रहीत्रापूर्वोक्तास्मितात्मपुरुषेणचोपरक्तस्यतद्रूपाभिभवेनयाग्राह्याकारतापत्तिः सासंप्रज्ञातः पूर्वोक्त
वितर्कविचारानंदास्मितानुगमात् चतुर्विधश्चानुर्विषयकः ग्रस्येतच्छः अत्रसूत्रेऽर्थक्रमवशात्ग्राह्यंभंको ग्रा

स्य ग्रहणग्राह्यग्रहीतृषु तत्स्थस्य तद्रूपारूढस्य चित्तस्य तदंजनता स्वरूपपरित्यागेन तद्रूपता तस्यास्समापत्तिरिति आत्मेन्द्रियस्थूलसूक्ष्मभेदेन चित्तस्य ग्रहीतृग्रहणग्राह्यत्वेन त्रिभिन्नपदमनिभक्तिकेऽस्मिन्नत्यन्तक्षीणवृत्तेः तत्स्थस्येति यो संपद्यते तत्स्थस्येव तदंजनं च तस्य भावस्तत्ता क्षीणवृत्तेस्तथा समापत्तिरित्यर्थः ४१ सेयं समापत्त्याख्या समापत्तिः पुनरुक्तभेदाच्चतुर्धा भवति सवितर्का निर्वितर्का सविचारा निर्विचारा चेति तत्र सवितर्कायाः स्वरूपमाह तत्र शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का ४२ तत्र तासु समापत्तिषु मध्ये सवितर्का समापत्तिरेषा ज्ञेया तथाहि गौरित्यत्र शब्दार्थज्ञानानि त्रीण्यपि भिन्नानि भासंते तत्र गौरिति शब्द इत्येको विकल्पः अयं हि गौरित्युपात्तयोरर्थज्ञानयोः शब्दाभेदविषयकः तथा गौरित्यर्थ इत्येको विकल्पोऽयं तु गौरित्युपात्तयोः शब्दज्ञानयोरर्थाभेदविषयकः एवं गौरिति ज्ञानमित्येको विकल्पः अयं तु गौरित्युपात्तयोः शब्दार्थयोर्ज्ञानाभेदगोचरः तथा ते विकल्पाः असदभेदगोचरत्वात् । एवं घटः पटः इत्यादयो विकल्पा ज्ञेयाः तत्र शब्दज्ञानाभ्यामभेदेन विकल्पिते स्थूले गवाद्यर्थे समाहितचित्तस्य योगिनः समाधिजन्यसाक्षात्कारे यथाकल्पितोऽर्थमेवगृह्णाति तथा सा समाधिप्रज्ञा शब्दार्थज्ञानानां विकल्पैः संकीर्णा नैस्तुल्या भवति विकल्पत्वाविशेषात् सा संकीर्णा

एभ ११

सवितर्का समापत्तिरित्यर्थः ४२ निर्वितर्कामाह स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का ४३ गवादिशब्दानां शक्तिरूपसंकेतो विकल्पितार्थेष्वेव लोके गृह्यते तस्य स्मृत्या शाब्दज्ञानेऽपरार्थानुमितिश्च विकल्प एव जायते तथा च श्रुते वानुमिते वार्थे श्रुतमिति रूपविकल्पमूला समापत्तिः सवितर्का भवति स्मृतिपरिशुद्धौ सत्यामर्थमात्रतासर्वसमाचित्तेनार्थमात्राभ्यासात् संकेतस्मृतेस्त्यागे सति तत्कार्यस्य विकल्पस्य त्यागात् समाधिप्रज्ञा स्वीयग्राहकत्वरूपं यत्नेन शून्येव भवत्यर्थमात्रनिर्भासाद् विकल्पितार्थरूपमग्राह्यं तत्स्वरूपेणैव निर्भासमाना निर्वितर्का समापत्तिरित्यर्थः तत्र सवितर्कसाक्षात्कारो यस्तदपरं प्रत्यक्षं विकल्पत्वात् निर्वितर्कप्रत्यक्षं तु परं तत्त्वार्थविषयत्वात् स च स्थूलार्थो गोघटादिरवयवी ज्ञेयः अत्र परमाणुपुंजातिरिक्तोऽवयवी नास्तीति बौद्धमतमपाकर्तुमहानेको घट इत्यबाधितानुभवादस्ति स चास्माकं मते भूतसूक्ष्मरूपाणां परमाणूनां परिणामः तस्य च तत्त्वोपादानेन भेदाभेदात्मकं तादात्म्यमिति भाष्ये साधितं ४३ एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता ४४ स्थूलपरिणामघटादिषु उपादानत्वेनानुगता ये परमाणवः ये च तन्मात्राणां विकाररूपाणां संस्थिताः सूक्ष्मास्तेषु विषयेषु स्वीयकार्यकारणदेशकालनानाविशेषण

यो· वृ·
१२

विशिष्टेषु स्ववाचकशब्दज्ञानाभ्यामभेदेन विकल्पितेषु या समापत्तिः सा सविचारोच्यते तेनैव सर्वविशेषणशू
न्येष्वर्थमात्रेषु परमाणुषु या समापत्तिः सा निर्विचारा सा खलु सूक्ष्मार्थमात्रस्वरूपा समाधिप्रज्ञा स्वरूपशून्येव
निर्भासते एतयैव स्थूलगोचरया सवितर्कया निर्वितर्कया च व्याख्यातया सूक्ष्मविषयया सविचारा निर्विचा
रा च व्याख्याता भवतीत्यर्थः ४४ ननु किमस्याः ग्राह्यसमापत्तेः परमाणुष्वेवावसानं नेत्याह सूक्ष्मविषयत्वं
चालिंगपर्यवसानं ४५ अस्याः समापत्तेः सूक्ष्मविषयत्वमलिंगे प्रधाने पर्यवस्यति तथाहि पार्थिवः परमा
णुर्गंधतन्मात्रादितरतन्मात्रांशकाज्जायते आप्यस्तु गंधतन्मात्रवर्जितात् रसतन्मात्रादितरतन्मात्रांशका
त् तैजसस्तु गंधरसद्वयवर्जितात् रूपतन्मात्रादितरद्व्यांशकात् वायव्यस्तु पूर्वहीनात् स्पर्शतन्मात्राच्छब्दत
न्मात्रांशकात् नभसः परमाणुत्वे कस्मादेव शब्दतन्मात्राज्जायत इति प्रक्रिया अतो विकारेभ्यः परमाणुभ्यः
उपादानानि पंचतन्मात्राणि सूक्ष्माणि तेभ्योप्यहंकारः सूक्ष्मस्तस्मादपि महांस्ततोपि प्रधानं तद्धि लयं नग
च्छतीत्यलिंगमुच्यते ततः परं सूक्ष्ममुपादानं नास्ति पुरुषस्य सूक्ष्मत्वेप्यनुपादानत्वात् पुरुषो हि भोगापवर्गार्थीस
पुरुषार्थनिमित्तके सर्वे निमित्तमात्रं भवति तस्मात्सूक्ष्मग्राह्यसमापत्तिः प्रधानपर्यंतेति सिद्धं ४५ एवं स्थूलसूक्ष्मे

राम·
१२

षु ग्राह्येषु चतस्रः समापत्तय उक्ताः संप्रति तासां संप्रज्ञातत्वमुपसंहरति ता एव सबीजः समाधिः ४६ ग्रहण
ग्रहीत्रोरपि सविकल्पत्वनिर्विकल्पत्वभेदेन सानंदा आनंदमात्रा सास्मिता अस्मितामात्रा चेति चतस्रः
समापत्तयो भवंति उक्राम्यापसाम्यात् एवमष्टसमापत्तयो यास्ता एव सबीजः समाधिः संप्रज्ञातः विवेकख्या
त्यभावेन बंधबीजसत्त्वात् सबीजत्वं द्रष्टव्यम् ४६ तत्र निर्विचारसमापत्तेः फलतोऽतिशयमाह निर्विचा
रवैशारद्येऽध्यात्मप्रसादः ४७ रजस्तमोमलापेतस्य बुद्धिसत्त्वस्य स्वच्छस्थितिरप्रवृत्तिप्रवाहः प्रधानांतसूक्ष्म
ग्राह्यगोचरेषु योपि निर्विचारसमाधेर्वैशारद्ये तस्मिन् सति क्रमेण परमाण्वादिप्रधानांततत्त्वसमूहा
लंबनः साक्षात्कारो योगिनः स्वात्मनिष्ठोऽध्यात्मप्रसादो भवतीत्यर्थः ४७ अस्य प्रसादस्य योगिसंमतां सं
ज्ञामाह ऋतंभरा तत्र प्रज्ञा ४८ तत्र वैशारद्ये सति या प्रज्ञा निर्विचारसमाधिजन्या तस्या ऋतंभरेति संज्ञा भवति
ऋतमविकल्पितं सर्वं बिभर्तीति व्युत्पत्त्यार्थः ४८ तस्याः इतरप्रमाणेभ्यो विषयतो विशेषमाह श्रुतानुमा
नप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात् ४९ गवादिशब्दानां गोत्वादिसामान्ये शक्तिर्न व्यक्तिविशेषेषु तेषामानंत्ये
नाशक्यग्रहत्वात् एवमाप्तिरपि व्यभिचारिसामान्यग्रहत्वेन अतः श्रुतानुमानप्रज्ञयोः सामान्यवस्तुविषयः न यादि

यो॰ वृ॰ लोके शब्दलिंगज्ञानानंतरं गोचरस्यादित्यनुमानं ज्ञापतेन व्यक्तिविशेषइति स्वसाक्षिकमेतत् । ऐंद्रियिकप्रत्यक्षस्य
१३ द्यपि गोचरादिविशेषविषयं तथापि सूक्ष्मव्यवहितविप्रकृष्टवस्तुविशेषः समाधिप्रज्ञाया असाधारणो वि
षयः ननु अस्मादिषु श्रुतानुमानप्रकाशितेषु प्रसक्ता तो समाधिप्रज्ञा कथं स्वमतलक्षितानुमानागोचरविशेषगो
चरा स्यादिति वाच्यं बुद्धेः स्वतः सर्वग्रहणशक्तत्वात् बुद्धिसत्त्वं हि प्रकाशस्वभावं सर्वार्थग्रहणसमर्थमपि
तमसावृतं सन्मानमेव स्वल्पविषयं भवति यदा तु समाधिना विगततमःपटलं सर्वतः प्रकाशमानमतिक्रां
तमानमर्यादं भवति तदा प्रकाश्यमानेस्यात् किंनामागोचरं स्यात् तस्मात् समाधिप्रज्ञा विशेषस्यापि गोचरत्वा
त् मानांतरविषयाद्न्यविषयेत्यर्थः तदुक्तं प्रज्ञाप्रसादमारुह्य अशोच्यः शोचतो जनान् भूमिष्ठानिव शैलस्थः
सर्वान्प्राज्ञोनुपश्यतीति जनान् समाधिशून्यान् मानभस्मानित्यर्थः ४९ ननु नादिना व्युत्थानादिविषयभोगसं राम॰
स्कारेणानिवर्त्तीयमानाभिहता समाधिप्रज्ञा न स्थितिं लभते इत्यत आह तज्जः संस्कारोन्यसंस्कारप्रतिबंधी ५० १३
निर्विचारसमाधिप्रज्ञाजन्यः संस्कारो व्युत्थानसंस्कारस्य प्रतिबंधी बाधक इत्यर्थः अनादिरपि व्युत्थानसंस्कार
स्तत्त्वास्पर्शित्वात्तत्त्वस्पर्शिप्रज्ञासंस्कारेण बाध्यते तद्बाधे व्युत्थानप्रत्ययान भवति समाधिप्रज्ञा तु भवति त

तः संस्कारः पुनः पुनरिति समाधिसंस्कारोपचयात् सर्वात्मना क्लेशक्षये सति भोगान्निर्विण्णं चित्तं पुरुषाभिमुखं
विवेकख्यातिं कृत्वा कृतकृत्यं लीनं भवति समाप्ताधिकारत्वात् ख्यातिपर्यवसानं हि चित्तचेष्टितमिति ५० न
नु संप्रज्ञातसमाधिप्रज्ञासंस्कारप्रवृत्तं चित्तं तत्त्वज्ञानपरंपरामेव कुर्वत् - कथं - निर्बीजसमाधिं कुर्यादित्यत आ
ह तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः ५१ पुरुषख्यातिसमनंतरं परवैराग्यसंस्कारप्रचयेन तस्य सं
प्रज्ञातसमाधिप्रज्ञासंस्कारस्यापि शाब्दसततापाश्च निरोधे सति सर्वस्य प्रज्ञातज्जसंस्कारप्रवाहस्य निरो
धादवसिताधिकारत्वेन चित्तस्य कृत्याभावात् निमित्तापाये नैमित्तिकापाय इति न्यायेन निर्बीजः समाधि
र्भवति तदुक्तं आगमेनानुमानेन ध्यानाभ्यासरसे - न च त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तममि
ति श्रवणेन मननेन पुरुषमात्रध्यानाभ्यासोयमेमेघाख्यः तद्रसेन परवैराग्येण प्रज्ञाप्रसादात्मना पुरुष
साक्षात्कुर्वन्निर्बीजयोगं लभत इत्यर्थः कालक्रमेणानिर्वर्तितनिरोधसंस्कारप्रचये सति स्वप्रकृतौ चित्तं लीयते
हेत्वभावात् कृतशेषलक्षणाधिकारो हि चित्तस्य स्थितिहेतुः न हि कृतभोगविवेकख्यातिमच्चित्तस्याकृत्यशे
षोस्ति तस्माच्चित्तस्य प्रलये पुरुषः स्वरूपमात्रप्रतिष्ठः केवलो मुक्त इति सिद्धं इति समाधिपादः पूर्वस्मिन्पादे यो

यो॰ सू॰ गमुद्दिश्य लक्षणमुक्त्वा वृत्तीर्निरूप्य तन्निरोधोपायावभ्यासवैराग्ये प्रतिपाद्य चित्तस्थित्युपायानुक्त्वाऽभिहितो हि
१४ विधो योगः सालंबनाभेदः प्रतिपादितः तत्राभ्यासवैराग्ये चित्तशुद्धिसाध्ये इति मत्वा तस्य शुद्धिहेतुमादौ क्रियायोग
माह तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः २ पूर्वपादोक्तस्य योगस्याङ्गित्वादेः साधनान्युच्यन्त इत्यनयोः
पादयोः संगतिः ब्रह्मचर्यगुरुसेवासत्यवचनकाष्ठमौनाकारमौनस्वाश्रमधर्मद्वन्द्वसहनमिताशनादिकं तपः
न कायशोषः धातुवैषम्यं योगविघातात् स्वाध्यायः प्रणवश्रीरुद्रपुरुषसूक्तादीनां पवित्राणां जपो मोक्ष
शास्त्राध्ययनं च फलाभिसंधिं विना कृतानां कर्मणां परमगुरावीश्वरे समर्पणमीश्वरप्रणिधानं तानि क्रिया
रूपो योगः योगसाधनत्वादित्यर्थः २ क्रियायोगस्य फलमाह समाधिभावनार्थः क्लेशतनूकरणार्थश्च २ नि
बिडेषु क्लेशेषु सत्सु समाधिर्न सिध्यति तस्मात्क्रियायोगः क्लेशांस्तनून् कृत्वा समाधिं भावयतीति तनूकरणात्क्ले राम॰
शानां सद्योऽभावे तत्कादाचित्क उपद्रवः भावने समाधेः स्यादिति तदर्थः फलं त्वस्य यथोक्तक्रियायोगेन क्लेशशक्ति १४
दुर्बलभावमाप्तः समाधिः विवेकख्यातिप्रसादसामर्थ्यात्तान् क्लेशान् दहतीति भावः २ अथ क्लेशाः कीदृशाः कि
यन्तो वेत्यत आह अविद्यास्मितारागद्वेषाभिनिवेशाः पंच क्लेशाः ३ क्लिश्यन्तीति कर्मतत्फलप्रवर्तकाः सन्तः पुरुषं

दुःखाकुर्वन्तीति क्लेशास्ते च पंचेत्यर्थः ३ तत्र चतुर्णामविद्याकार्यत्वेनाविद्यात्वमाह अविद्याक्षेत्रमुत्तरेषां
प्रसुप्ततनुविच्छिन्नोदाराणाम् ४ उत्तरेषामस्मितादीनामविद्याक्षेत्रं प्रसवभूमिः तेषामवान्तरभेदमाह प्रसुप्तेति
प्रसुप्ताः तनवो विच्छिन्ना उदाराश्च तेषां तत्र विदेहप्रकृतिलयानां योगिनां क्लेशाः प्रसुप्ताः विवेकख्यात्यभावे
नारब्धतया शक्तिरूपेणावस्थानात् अतस्ते पुनरुद्भवन्ति क्रियायोगिनां तनवः विषयसंगिनां विच्छिन्ना उ
दाराश्च भवन्ति यथा चैत्रस्य यस्यां रागस्तत्र क्रोधो विच्छिन्नो रागः उदारः एवं यत्र क्रोध उदारस्तत्र रागो विच्छिन्नः
कालेनोदारीभूताश्च विषयेषु क्लेशयन्ति एते क्लेशा अविद्यामूलाः तस्याः पुरुषापरोक्षख्यात्या सति निवृत्तौ नि
वर्तन्ते यथा जीवन्मुक्तस्य क्लेशाः क्षीणा इति पंचमी क्लेशानामवस्था द्रष्टव्या ४ तेष्वविद्यारूपमाह अनि
त्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या ५ अमरा देवा इत्यनित्येषु नित्यत्वभ्रान्त्या देवत्वाप्य
कर्म कृत्वा बध्यन्ते रागवशाश्चाशुचौ स्त्रीकाये शुचित्वभ्रान्त्या बध्यन्ते यदुक्तं भगवता वेदव्यासेन स्थानाद्बीजादुपष्ट
म्भान्निष्यन्दान्निधनादपि कायमाधेयशौचत्वात्पण्डिता ह्यशुचिं विदुरिति [illegible] मातुरुदरं [illegible]
[illegible] तद्बीजं अन्नपरिणामश्लेष्मादिरूपष्टंभः स्वेदाद्यैर्मलानां स्रवणं निष्यन्दः निधनं मरणं तेन हि

योवृ·
१५

श्रोत्रियकायोप्यसंतांश्चनिर्भवति आधेयशौचत्वंस्नानानुलेपनादिनाशुचित्वापादनेनतथापरिणामदुःखेभो
गेसुखत्वख्यातिरनात्मनिबुद्ध्यादावात्मख्यातिः अविद्याअतस्मिंस्तद्बुद्धिः तत्वविद्याविरोधिनीत्यर्थः यद्यपि
शुक्तिरूप्याद्यविद्याः संतितथाप्येषचतुर्विधैवाविद्याबंधमूलमितिभावः ५ दृग्दर्शनशक्त्योरेकात्मतेवा
स्मिता ६ दृग्शक्तिः पुरुषः दृश्यतऽनेनेतिदर्शनंतच्छक्तिः बुद्धिः शक्तिशब्दोयोग्यतार्थकः भोक्तृत्वभोग्यत्वयो
ग्ययोरत्यंतविविक्तयोर्दृग्दर्शनयोरविद्याकृतैकात्मतातादात्म्यरूपत्वाद्वैताहममस्मीतिभ्रांतिरूपत्वेनतादृशा।
त्म्यस्यद्योतयतिस्मास्मितेत्यर्थः अयंहृदयग्रंथिरित्युच्यतेब्रह्मवादिभिः ६ अस्मितायाः कार्यरागंनिरूपय
ति सुखानुशयीरागः ७ सुखानुभवस्मृतिपूर्वकस्तज्जातीयसुखेतत्साधनेवायस्तृष्णामयरागः सुखमनु
शेतेविषयी करोतीतिसुखानुशयीत्यर्थः ७ दुःखानुशयीद्वेषः ८ दुःखानुभवितुःस्मरतोदुःखतत्साधनयोर्यः
क्रोधः सद्वेषइत्यर्थः ८ स्वरसवाहीविदुषोपितथारूढोभिनिवेशः ९ विदुषोमूर्खस्यवाजंतुमात्रस्ययोमरणत्रा
सः सोभिनिवेशः यथामरणस्याहंमाभूपासमितिरूढत्रासः तथाविदुषोपिदृढोदृश्यतेयतः स्वरसवाहीसं प्र
वंजन्मसु सकृन्मरणदुःखानुभवजन्यवासनासंघः स्वरसस्तेनवहतिप्रवहतीतिस्वरसवाही अनेनभयेनदेहा।

राम·
१५

त्तिरिक्तात्माभाव्यप्रसंगाद्दर्शितः दृश्यतेहिजातमात्रस्यबालस्यमरणाद्भयंतच्चपूर्वमरणानुभवंविनानुपपन्न
मिति एतेचाविद्यादयः पंचक्रमेणतमोमोहोमहामोहस्तामिस्रोंधतामिस्रइत्युच्यंते तत्राव्यक्तमहदहंका
रपंचतन्मात्रेष्वष्टस्वनात्मस्वात्मबुद्धिरविद्यातमः अणिमाद्यष्टैश्वर्येष्वणुरहमस्मिमहानस्मीतितादात्म्यंमोह
स्तेनहिअणिमाभेदेनशब्दादिदशविषयेषुरागोमहामोहः कुतश्चिदैश्वर्यविघातेनतन्निमित्तकदशविषय
भोगालाभेसत्यष्टादशोक्तविघातकेद्वेषस्तामिस्रः एतेषामेवाष्टादशानामिष्टानांनाशाद्भयमंधतामिस्र
इति तथाचसांख्यकारिकामे भेदस्तमसोष्टविधोमोहस्यचदशविधोमहामोहः तामिस्रोष्टादशधातथाभवत्यंध
तामिस्रइति ९ तेचयंचक्लेशाद्विविधाः पुरुषख्यात्यारब्धाः संस्काररूपाः सूक्ष्माः क्रियायोगेनमैत्र्यादिभाव
नस्यपरिकर्मणाच तनूकृताः स्थूलाइतितत्सूक्ष्माणांहानोपायमाह तेप्रतिप्रसवहेयाः सूक्ष्माः १० चि
त्तस्यकृतकृत्यस्यास्मितायांप्रलयः प्रतिप्रसवस्तेनहेयाः सूक्ष्मास्तेक्लेशाः धर्मिनाशादेवतेषां
संस्काररूपाणांनाशइत्यर्थः १० स्थूलानांहानोपायमाह ध्यानहेयास्तद्वृत्तयः ११ याः क्रियायोगेनतिरस्कृताः क्लेशाद्वृ
त्तयः स्थूलाः सुखदुःखमोहात्मिकास्ताः पुरुषाः ध्यानेनैवहातव्याइत्यर्थः यथालोकेवस्त्रस्यातिस्थूलोमलः प्र

यो॰वृ॰ स्थूलत्वेनैते रागादयो ध्यानेनापह्रियन्ते स्थूलाः संयोगादिना मलवासनानुवस्त्रनाशेनैव नश्यति तथा क्रियायो-
१६ गेनातिनिविडाः क्लेशा विरलीभवन्ति विरलास्तु ध्यानेन तनूकृताः सूक्ष्मास्तु चित्तनाशेन नश्यंतीति भावः
११ क्लेशान्निरूप्य तत्कार्यं तेषां क्लेशात्मिसांशकाकर्मतत्फलमूलत्वेन बंधकत्वात्तेषां क्लेशात्मिस्याह क्ले-
शमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः १२ अत्र त्रिभिः पदैः क्रमेण कर्मणो हेतुस्वरूपकार्याण्युच्यन्ते आ-
शेरते सांसारिकाः पुरुषा अस्मिन्नित्याशयः कर्मणां धर्माधर्मरूपः संस्कारः क्लेशाः कामक्रोधादयो मूलम-
स्येति क्लेशमूलः स च द्विविधः दृष्टजन्मवेदनीयोऽदृष्टजन्मवेदनीयश्चेति येन देहेन कर्म कृतं तेन तद् दृष्टज-
न्म तेनैव देहेन भोक्तव्यः आद्यः यथा नंदीश्वरो बाल एव मनुष्यदेहेन तीव्रसंवेगेन मंत्रतपःसमाधिभिरीश्व-
राराधनं कृत्वा सद्य एव देवत्वजातिं दीर्घमायुः दिव्यभोगं च लब्धवान् तथा विश्वामित्रो जात्यायुषी लब्धवान् राम॰
तथा भीतव्याधितकृपणविश्वस्तमहानुभावेषु कृतापराधः सद्य एव पच्यते यथा नहुषस्य महर्ष्यपराधे- १६
न सद्यः सर्पत्वमभवत् द्वितीयस्तु जन्मांतरभोग्यः स्वर्गनरकादिहेतुः कर्माशय इत्यर्थः १२ अयं क्षीणक्लेशा-
नां नास्तीति विशेषमाह सति मूले तद्विपाको जात्यायुर्भोगाः १३ क्लेशाख्ये मूले सत्येव कर्मणो विपाकः फ-

---

लं भवति न त्वक्लेशयोगे भुंक्ते न यः कामस्य क्वचिदपि कर्मजं फलं सुखदुःखादिज्ञानिनस्य तदूग प्रोच्यते अमी विवेक-
ख्याग्निदग्धेषु क्लेशेषु कर्मबीजं वितुषधान्यादिवन्न फलं प्रसूते स विपाकस्त्रिविधः जातिर्जन्म देवत्वादि-
रायुश्चिरकालं देहप्राणयोर्योगः इंद्रियैर्विषयानुभवो भोग इति तत्र भोगो मुख्यः जात्यायुषी तच्छेषे इति।
विभागः तत्रैकस्मिन्देहे विचित्रभोगदर्शनादनेकानि कर्माणि मरणकाले मिलितान्येकं कर्मारभंते अत
एकभविकः कर्माशय उच्यते तस्य कश्चिज्जातिं कश्चिदायुः कश्चिद्भोगं कश्चिद्द्वयं कश्चित्त्रयमिति फलवैचि-
त्र्येण तदुक्तं भगवता गहना कर्मणो गतिरिति विस्तरस्तु भाष्ये द्रष्टव्यः १३ अधुना जात्यादीनां हेयत्वार्थं
फलमाह ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात् १४ ते जात्यायुर्भोगाः पुण्यहेतुकाः सुखफलाः अ-
पुण्यपापहेतुकाः दुःखफलाः अत्र भोगो विषयानुभवः मिश्रस्तु सुखदुःखानुभवो भोगः तस्य कर्मसाध्य-
त्वेन सुखदुःखफलेगमनस्येवद्यामरस्माह १४ ननु ते दुःखफलाः हेयाः भवंतु सुखफलास्तु कथं हेया इत्यत
आह परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः १५ परिणामोऽन्यथाभावः ता-
पो वर्तमानः संस्कारो भूतः एतान्येव दुःखानि त्रैकालानीति विग्रहः तथाहि विषयसुखभोगात्कामानलो वर्द्धते तद्दोष

स्यां कामाप्राप्तावेदुःखमवश्यंभावित्वात् भेमिकृतच्छिद्रोगसंकोचे दुःखसंकोचके द्वेषः ततः कामद्वेषाभ्यां पापोप
चयात्दुःखमसंक्लोचे आधिः पापचयात्ततो दुःखमेवं भोगस्य परिणामदुःखता यथा सुखभोगकाले विषयनाश
शीत्याद्दुःखं वर्तते नाशके द्वेषात्तु तापोऽस्तीति तापदुःखता भोगस्य तथा सुखभोगनाशे संस्कारो भवतीति तेन
स्मरणाद्रागे सति पुनः पुण्योपचयात्सुखदुःखभोगः पुनः संस्कार इत्यनंता दुःखसंततिः यदि भोगनाशे सं
स्कारो न स्यात्तदा न दुःखसंततिः। भवस्य च तु संस्कार इति संस्कारदुःखता इमानि दुःखानि विवेकिनोऽक्षि
पात्रकल्पस्य योगिनस्तु द्वेशकानि न तु कठिनचित्तानां कर्मिणां यथाक्षिपात्रे मृदुकल्पः ऊर्णातंतुरप्युद्वेज
यति नान्यमवयवं तस्माद्विवेकिनः सर्वमेव भोगसाधनं विषमिश्रान्नवद्दुःखमेव परिणामतापसंस्कारदुःखै
र्योगाद्गुणवृत्तिविरोधाच्च गुणाश्रितानामन्योन्यपरिणामानि सत्वरजस्तमांसि तेषां वृत्तयः सुखदुःखमोहात्मा।
सां विरोधः परस्परमभिभाव्याभिभावकत्वं तस्मादिसर्पः चलं हि गुणवृत्तं तच्च चित्ते यावत्सत्ववृत्तिरपि भवति
धर्मोऽस्त्वात्वा पुनरधर्मोऽस्त्वाद्धर्माभिभवे सतीति विरोधो भवतीति दुःखत्वं स्वाभाविकं सत्वस्यापि सुखरूपतिः स्वभावतो दुःख
रूपैव सत्ववृत्तिः दुःखात्मकरजोमिश्रसत्वपरिणामत्वात् किंतु सुखकाले सत्वप्राधान्यात्स्यात् दुःखत्वमस्फुटं रजस्ता

सत्वतिरोभावे सति स्फुटमिति सुखदुःखयोर्भेदव्यपदेशः एतेन सुखस्य मोहत्वं व्याख्यातं। अतो गुणपरिणामात्म
कं सर्वमेव जगद्दुःखमोहात्मकं हेयमिति सिद्धं १५ तदुपयथा चिकित्साशास्त्रे रोगो रोगहेतुरारोग्यं तद्धेतुरिति चतु
र्व्यूहं यत्साध्यं तथा इदमपि शास्त्रे हेयं हेयहेतुर्मोक्षस्तद्धेतुरिति चतुर्व्यूहं व्यासादपि तु विशिष्य हेयं दर्शयति हेयं
दुःखमनागतं १६ अतीतस्य दुःखस्य भोगेन गतत्वाद्वर्तमानदुःखस्य भोगेन विसमाप्त्यनागतमेव दुःखं हेयमिति स
र्यः १६ हेयहेतुमाह द्रष्टृदृश्ययोः संयोगो हेयहेतुः १७ द्रष्टा चिद्रूपः पुरुषो बुद्धिस्य स्वच्छायात्मके दर्शनवान् दृ
श्यं बुद्धिसत्वं तयोः संयोगः स्वस्वामिभावः बुद्धिसत्वं हि त्रिविधं शब्दाद्याकारेणेंद्रियद्वारा परिणतं निश्छा
यापत्या पुरुषस्य मेये न दृश्यमानं सन्निधिमात्रेण अयस्कांतमणिवदुपकारकं स्वनिष्ठं भोगापवर्गौ पुरुषे दर्शयत्
स्वं भवति पुरुषस्य स्वामिनः सोऽयमभेदभ्रांतिरूपाविद्याकृतः पुरुषार्थाधीनस्थितिकः संयोगो हेयस्य दुःखस्य
हेतुरित्यर्थः १७ दृश्यं प्रपंचयति प्रकाशक्रियास्थितिशीलं भूतेंद्रियात्मकं भोगापवर्गार्थं दृश्यं १८ प्रकाशशी
लं सत्वं क्रियाशीलं रजः स्थितिः प्रकाशक्रिययोः प्रतिबंधः तच्छीलं तमः तत्र सत्वं मृदुत्वात्स्वल्पतापकं रजः एवं सत्व
रजसोः स्वल्पतापकभावे सति तमसा मोहो भवति पुरुषस्य ममतापरिताततः तदिदं गुणत्रयं स्वस्वकार्ये मिथः सहाय

यो॰ सू॰ १८ मविवेकिभोग्यं विवेकिसाक्ष्यं परस्पराश्रयं परस्पराभिभावकं परस्परांगांगिभावेनसत्त्वप्रकाशात्माद्यवुः रक्रियोप
ष्टंभकमोहावरणगौरवलक्षणकार्यंतेषभेदत्वात् परस्पराविभागात् उक्तीनभेदंप्रधानशब्दवाच्यंभवेद्दृश्य।
त्मकं। भूतानिस्थूलानितन्मात्राणिचेंद्रियाणिज्ञानकर्मेंद्रियाणिदशबुद्ध्यहंकारमनांसित्रीणीत्येतःकरणान्या
त्मस्वाभिन्नः परिणामोयस्यतत्भोगायतनार्थंभोगमोक्षप्रयोजनकंदृश्यमित्यर्थः १८ एतेषांगुणानांपरि
णामंविभज्यदर्शयति विशेषाविशेषलिंगमात्रालिंगानिगुणपर्वाणि १९ विशिष्यन्तेइतिविशेषाः माह
नाषोडशविकाराः खवायुतेजोम्बुवनयःस्थूलभूतानिपंचज्ञानकर्मेंद्रियाणिदशमनश्चेत्येतेषोडशविकारा
एवनतत्त्वान्तरप्रकृतयः एतेषांविकाराणांप्रकृतयोबुद्धेर्विकृतयः षट्अविशेषाः पंचतन्मात्राहंकारश्चाहंका
रश्चतन्मात्राणीतिसांख्याः अहंकारस्यानतानिबुद्धेःयस्मानितन्मात्राणीतियोगाः तत्रपंचतन्मात्राणि
शब्दस्पर्शरूपरसगंधाख्यानिस्थूलभूतानांप्रकृतयः अहंकारःसत्त्वेनरजसाउभयेनज्ञानकर्मेंद्रियमनसांप्र एम॰ १८
कृतिःलयंगच्छतीतिलिंगंतन्मात्रंमहत्तत्त्वंमात्रंचाविशेषाविशेषाभ्यांवैलक्षण्येपिप्रासनेनतद्भिर्विकस्यका
र्यसामान्यात्मकंप्रधानस्यकार्यं अलिंगगुणानांसाम्यावस्थारूपंप्रधानं एतानिचत्वारिगुणानांपर्वाणि

परिणामाः गुणास्त्वेचेतनंप्रतिविशेषत्वमंतमं १९ एवंदृश्यंनिरूप्यद्रष्टारंनिरूपयति द्रष्टादृशिमात्रःशुद्धोपिप्रत्य
यानुपश्यः २० द्रष्टापुरुषोदृशिमात्रश्चिन्मात्रोनज्ञानादिधर्मकः अतःशुद्धोपरिणाम्यपिप्रत्ययंबुद्धिवृत्तिमनु
स्मपश्यतीतिप्रत्ययानुपश्यः स्वस्वबुद्ध्यविवेकाद्वृत्तिभिरेकीभूतः शब्दादीन्पश्यतीत्यर्थः तदुक्तंवृत्तिसा
रूप्यमितरत्रेति २० एवंदृश्यद्रष्टारावुक्तौतयोःशेषशेषित्वमाह तदर्थएवदृश्यस्यात्मा २१ दृश्यस्यभोग्य
स्यस्वरूपंदृश्यमेवनस्वार्थमचेतनत्वादित्यर्थ २१ ननुतर्हिद्रष्टुःप्रयोजनेनिष्पन्नेसतिकृत्स्नाभावाद्दृश्यंप्र
धानंनिर्व्यापारंस्यात् तथाचाधुनासंसारेणोपलभ्येतेत्यतआह कृतार्थंप्रतिनष्टमप्यनष्टंतदन्यसाधा
रणत्वात् २२ प्रधानमेकंपुरुषाअनंताइतिस्थितिः अजामेकामितिस्मृतेः तत्रप्रधानंपुरुषंप्रतिभोगा
पवर्गीकृतवत्सकृतार्थः स्वामित्वात् यथाभृत्येनकृतंजयेनस्वामीकृतजयइत्युच्यते तद्वत्कृतार्थंम
कंपुरुषंप्रतिनष्टमदर्शनंगतमपितद्दृश्यमनष्टंपुरुषांतरसाधारणत्वात् एतदुक्तंभवतिपुरुषार्थोत्पादनाग
तावस्य प्रधानस्यप्रवृत्तिहेतुः तत्रकृतार्थंप्रतिप्रवर्तकाभावात्प्रधानस्याप्रवृत्तावपिअकृतार्थंप्रतिमहदा
द्याकारेणप्रवृत्तिर्घटतेतथाचैकस्यमुक्तौसर्वेषांमुक्तिप्रसंगोनास्तीति २२ एवंदृश्यद्रष्टारौव्याख्यायपरयोर्हेतु

संयोगं निरूपयति स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः २३ स्वं दृश्यं तस्य शक्तिर्जडत्वेन दृश्यत्वयोग्यता स्वामी तु पुरुषस्तस्य शक्तिश्चेतनत्वेन द्रष्टृत्वयोग्यता स्वरूपात्मिके वत्तयोः स्वस्वामिस्वरूपयोः शक्त्योर्विविधशब्दाद्याकारदृश्यबुद्धिस्वरूपस्योपलब्धिर्भोगः स्वामिस्वरूपस्योपलब्धिरपवर्गः तद्धेतुः संयोगः स्वस्वामिभावाख्यः स एव द्रष्टृदृश्यभावो भोक्तृभोग्यभावरूपत्वाख्यायते यस्याभावे दृग्दृश्ययोः स्वरूपोपलब्धिर्न भवति यश्चावश्य भवति स संयोगः कार्यगौरवत्वे परस्परद्विष्टं भवति २३ एवं संयोगस्य स्वरूपं कार्यं चोक्त्वा कारणमाह तस्य हेतुरविद्या २४ भ्रान्तिज्ञानवासना संयोगस्य कारणमित्यर्थः अहमिति दृग्दृश्ययोरभेदप्रत्ययो भ्रान्तिः तद्वासनावासितं चित्तं प्रलये लीनं प्रधानभावमुपगतं सर्गकाले पुरुषं प्रतिमत्वेनैवं ज्ञायते तेन संयोगे नाविवेकिनो वंधो विवेकिनो मोक्षश्च भवति एतया वासनाद्विवासनाविविक्तया चित्तवर्तिन्याऽविद्ययाऽऽसमंततो मत्स्यो जालेनेवानुविद्धः पुरुषः पशुसकर्मोपहतं तु एतमुपायं तत्त्वं तस्मात्क्रमपारदर्शनं ज्ञानमेवा नात्मस्वरूपकारममकारानुपातिनं ज्ञानं ज्ञानेनाख्याध्यात्मिकाभयनिमित्तास्त्रिपर्वाणस्तापाश्च नु भवंते २४ एवं हेयं तद्धेतुं चोपपाद्य हेयस्य हानं मोक्षं प्रतिपादयति तदभावात्संयोगाभावो हानं तद्दृशेः कैवल्यम् २५ तस्याश्चाविद्यायाश्च

भावाद्विद्यानाशात्तत्कार्यस्य बुद्धिपुरुषसंयोगस्य दुःखस्य हेयस्य हेतोरभावो विनाशो हानं यत्तदेव दृशेः नित्यमुक्तस्य कैवल्यमित्यर्थः २५ मोक्षमुक्त्वा तद्धेतुमाह विवेकख्यातिरविप्लवा हानोपायः २६ दृग्दृश्ययोर्भेदो विवेकस्तस्य ज्ञानं ख्यातिर्विप्लवो मिथ्याज्ञानं स्यादौ खल्वागमात्सामान्यतो विवेकख्यातिरुदेति सा नाविद्यां हन्ति परोक्षत्वात् यदा सा मननेन स्थापिता सती सर्वत्राविरक्तेन पुरुषाभिमुखेन चित्तेन निरंतरमभ्यस्यते तदा ध्यानप्रकर्षपर्यंतज्ञानि चित्तनिर्विंदवती सा साक्षात्काररूपा सवासनमिथ्याज्ञानं निर्हृत्य विद्रवा सती परवैराग्यपूर्वकनिरोधनसंस्कारपोषस्य कृतस्य प्रारब्धावसाने आत्यंतिकनिवृत्तिरूपो भाविरुः एव हानस्य मोक्षस्योपाय इत्यर्थः २६ स्थिरविवेकख्यातेर्जीवन्मुक्तस्य ज्ञानवैभवमाह तस्य सप्तधा प्रांतभूमिः प्रज्ञा २७ प्रकृष्टोंतोवसानं फलत्वेन यासां ताः प्रांताश्चरमा इति यावत् प्रांता भूमयोऽवस्था यस्याः सा प्रज्ञा प्रांतभूमिः स्थिरविप्लवात्मख्यातेर्द्दृष्टुः प्रत्ययांतरतिरस्कारेण सप्तप्रकाराः प्रज्ञावस्थाश्चरमा भवंति ज्ञातव्यमखिलं ज्ञातमतः परं न किंचिज्ज्ञातव्यमस्तीत्येका सर्वजिज्ञासानिवर्त्तकत्वाद्विप्रांता न हीयमानात्मज्ञस्य संभवति तस्य तदालंबनसमाधिना प्रधानांतप्रज्ञायाः स्थिरायामप्यात्मजिज्ञासायाः सत्वेन तत्प्रज्ञाया अचरमत्वात् एवमग्नि

यो॰ वृ॰ मावस्थानां प्रांतत्वं मंतव्यं हातव्याः सर्वे वंधहेतवो हताः न किंचिन्मम हेयमस्तीति द्वितीया पाकैवलस्य प्राप्त्या प्रा
२० प्तमखिलं प्राप्तमतोस्मान्न किंचिदपि मम प्राप्तमस्तीति तृतीया विवेकख्यातिसंपादने न कर्त्तव्यमखि
लं कृतं न किंचित्कार्यमस्तीति चतुर्थी ता अपि तस्याः कार्यविमुक्तिसंज्ञाः चित्तविमुक्तिसंज्ञाः तिस्रः यथा कृ
तार्थं मे बुद्धिसत्वमित्येका बुध्यादिरूपा गुणा अपि गिरिशिखरच्युता इव ग्रावाणो निरवस्थानाः स्वकारणे
प्रलयाभिमुखाः सह तेनास्तमायंतिकं गच्छंतीत्येषां नास्ति पुनः प्ररोहः प्रयोजनाभावादिति द्वितीया अ
था गुणातीतः स्वस्वरूपमात्रावस्थितश्चिदेकरस इति तृतीया मत्तावस्थेति जित्वा सानि हा सा ये सात्विकी वी
शोकभयविकल्पात् तफलाः सप्त प्रज्ञाभूमयः प्रांतावस्था इत्यर्थः॥ २७॥ संप्रति प्रज्ञासाधनमाह योगांगा
नुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः॥ २८॥ योगांगानां योगस्यानुष्ठानादशुद्धेः क्लेशाकर्म्मरूपायाः एम॰
क्षये ज्ञायमाने ज्ञानस्य दीप्तिर्विशुद्धिर्निर्विलवविवेकख्यातेर्भवतीत्यर्थः योगांगानुष्ठानं शुद्धि २०
द्वारा प्रज्ञासाधनमिति भावः॥ २८॥ कानि योगांगानीत्यत आह यमनियमासनप्राणायामप्रत्याहारधारणा
ध्यानसमाधयोष्टावंगानि॥ २९॥ तत्र के यमा इत्यत आह अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः॥ ३०॥ अत्रानये

स्त्वेन सफलत्वात् यमा आदावुक्तास्ते यमा आयमसाध्ये स्त्रानियमाः एतदुभयाधीनश्चाद्यः पेक्षा आसनादय
उत्तरोत्तरहेतवः पश्चादुक्तं तत्राहिंसा नाम मनोवाक्कायैः सर्वदा सर्वभूतानामपीडनं परः श्रेष्ठ एष धर्मः अ
न्ये यमादयः एतस्मादश्चुधर्माः तथाचोक्तं स खल्वयं ब्राह्मणो यथा यथा व्रतानि बहूनि समादित्सति
तथा तथा प्रमादकृतेभ्यो हिंसानिदानेभ्यो निवर्त्तमानस्तामेवावदातरूपामहिंसां करोतीति सत्यं परहि
तार्थं यथार्थकथनं वलाद्धूहसि वा परवित्तहरणं स्तेयं तदभावोस्तेयं उपस्थसंयमः ब्रह्मचर्यमुप
स्थसंयमः स्त्रियः प्रेक्षणालापस्पर्शश्रवणध्यानत्यागः तदंगं अपरिग्रहो नाम देहयात्रानिर्वाहकाति
रिक्तभोगसाधनास्वीकारः एते पंच यमाः योगस्य विरोधिहिंसानृतस्तेयस्त्रीसंगपरिग्रहनिरासकत्वेनांग
त्वमजंते एतेषां योगिभिः पादेयविशेषमाह जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतं॥ ३१॥ जा
तिर्गोत्वब्राह्मणत्वादिः देशस्तीर्थादिः कालो नियतश्चतुर्दश्यादिः अनियतो ब्राह्मणप्रयोजनादयः समयः
न च स त्वगो ब्राह्मणान् हनिष्यामीत्यहिंसा जात्या परिच्छिन्ना कमपि तीर्थे या चतुर्दश्यां वा न हनिष्यामीति देश
कालाभ्यामवच्छिन्नात्देवब्राह्मणार्थं भोजनादिसमयातिरेकेण न हनिष्यामीति समयावच्छिन्ना या शिमा

यो·सू· त्रं कश्चिदपि कदाचिदपि कस्यापि कृते हं न हनिष्यामीति जात्यादिभिश्चतुर्भिरनवच्छिन्ना भवत्यहिंसा पुष्क
२२ ला एवं सत्यादयोप्यनवच्छिन्ना कर्तव्याः एवं सर्वासु जात्यादिषु भूमिषु कृत्स्नमव्यवस्थासु विहिताः सार्व
२१ भौमा महाव्रतमित्युच्यते इत्यर्थः। नियमानाह शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः
३२ शौचं मृज्जलादिकृतं गोमूत्रयावकादिमेध्याहारकृतं च बाह्यं आंतरं मैत्र्यादिभावनया चित्तस्य मदा
दिमलनाशनं संतोषः सन्निहितप्राणधारणमात्रहेतुना तुष्टिः तपो द्वंद्वसहनं यथायोगं कृच्छ्रादिकं च
स्वाध्यायः प्रणवाद्यभ्यासः ज्ञानतोऽज्ञानतो वापि यत्करोमि शुभाशुभं तत्सर्वं त्वयि संन्यस्तं त्वत्प्रयुक्तः
करोम्यहं कर्मणा मनसा वाचा या चेष्टा मम नित्यशः केशवाराधने सा स्याज्जन्मांतरेष्वपि इति परमगुरौ
सर्वकर्मार्पणमीश्वरप्रणिधानमित्यर्थः वितर्कबाधने प्रतिपक्षभावनं ३३ एतेषां यमनियमानां वित एम
र्कैर्हिंसादिसकृत्स्नैर्हनिष्याम्येनमपकारिणमनृतं वक्ष्यामि परस्वमादास्ये इत्यादिभिः बाधने प्राप्ते सति २२
यमादिपरो ब्राह्मणः प्रतिपक्षभावनं कुर्यात् घोरेषु संसारांगारेषु पच्यमानेन मया शरणमुपगताः सर्व
भूताभयप्रदानेन यमादिधर्माः स एव स्वं हत्वा हिंसादीन् पुनस्तानाददानस्तुल्यः शुनेति यथा श्वा वांताशी

तथा सक्तस्य पुनराददान इति वितर्कप्रतिपक्षान्भावयेदित्यर्थः ३३ संप्रति वितर्काणां स्वरूपप्रकारकारणावांत
रभेदफलानि पंचभिः पदैः क्रमेण वदन् प्रतिपक्षभावनं स्फुरयति वितर्का हिंसादयः कृतकारितानुमोदिता
लोभक्रोधमोहपूर्वका मृदुमध्याधिमात्रा दुःखाज्ञानानंतफला इति प्रतिपक्षभावनं ३४ वितर्क्यंत इति वि
तर्का हिंसादय इति स्वरूपोक्तिः तत्र हिंसा त्रिप्रकारा स्वयं कृता कुर्विति कारिता साधु साध्विति अनुमोदिता चे
ति तत्रैकैका पुनस्त्रिविधा भवति कारणभेदात् मांसचर्मादिलोभेनापकृतमनेनेति क्रोधेन धर्मो मे भवि
ष्यतीति मोहेन एवं नवधा जाता हिंसा पुनः लोभक्रोधमोहाः प्रत्येकं त्रिविधा भवंति मृदुमध्याधिमात्रत्वेन
तत्पूर्वका हिंसादयोपि मृदवो मध्या अधिमात्राश्च भवंति तथा कृता कारितानुमोदिता च प्रत्येकं नवधा भ
वंतीति हिंसायाः सप्तविंशतिर्भेदा भवंति मृदुमध्याधिमात्रा अपि प्रत्येकं त्रिधा भवंति मृदुमृदुः मध्यमृदुः
स्तीव्रमृदुः मृदुमध्यो मध्यमध्यस्तीव्रमध्यः मृदुतीव्रो मध्यतीव्रस्तीव्रतीव्र इति एवं लोभो नवविधः एवं क्रोधमोहा
विति तत्पूर्वीकृता हिंसा सप्तविंशतिभेदा भवति तथा कारितानुमोदिता चेत्येकाशीतिभेदा हिंसा भवति एवं
मनृतादिष्वपि योज्यं असंख्यं भूता वितर्का दुःखं नरकादिकमज्ञानं स्थावरादिभावं भ्रांतिसंशयरूपं वा तत्फलयंती

यो· वृ· त्ति प्रतिपक्षाणां वितर्कशत्रूणां दोषाणां भावनमित्यर्थः तेन दोषचिंतनेन वितर्का हेयाः स्युरुपदिष्टं भवति तदा
२३ नेसति निर्विघ्ना यमनियमादयाः सिध्यंति तत्सिद्धौ चित्तशुद्धिद्वारा कैवल्ये अतो योगः सिध्यतीति नास्यर्थस्य प्र
तिद्यमानां सिद्धिसूचकमवांतरफलं क्रमेणादर्शयति अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः ३५ अहिंसा
सिद्धौ सत्यां तस्याहिंसकस्य मुनिवर्यस्य सन्निधौ सहभावविरुद्धानामहिनकुलानामपि वैरत्यागो भवतीत्यर्थः
सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वं ३६ सत्यप्रतिष्ठायां सत्याक्रिया धर्माधर्मरूपा तत्फलं स्वर्गादिकं तयोरा
श्रयो वाङ्मात्रेण समातस्य भावः तत्त्वं भवति यथा धार्मिको भूया इत्युक्ते भवति धार्मिकः स्वर्गं प्राप्नुहीत्युक्ति
मात्रादधार्मिकोऽपि तथैव भवतीत्यर्थः अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानं ३७ अचौर्यं यदाभ्यसति सर्वेषां
दिव्यरत्नानामस्य संकल्पमात्रेण प्राप्तिर्भवतीत्यर्थः ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः ३८ वीर्यनिरोधो ब्रह्म राम
चर्यं तत्सिद्धौ निरतिशयं सामर्थ्यं भवति येनाणिमाद्युपस्थितिर्भवति शिष्येषूपदेशः सम्यक् फलतीति २३
भावः अपरिग्रहस्थैर्ये जन्मकथंतासंबोधः ३९ अपरिग्रहशीलस्य तत्स्थैर्ये सति अतीतवर्त्तमानभाविज
न्मनां यः कथंता किंप्रकारता तस्याः सम्यग्बोधो जिज्ञासापूर्वको भवतीत्यर्थः किंरूपं जन्म किंप्रकारकं किं

फलकं किमवसानमिति शरीरपरिग्रहविरोधिनी जिज्ञासा भवति ततः कार्यकारणसंबंधः पुरुषस्याजस्य जन्म
नरदेवतिर्यक्प्रकारं क्लेशकर्महेतुकं दुःखैकफलकं पुरुषतत्त्वसंबोधावसानमिति सा चापरिग्रहवतो निःश्चिसा
शरीरः सत्त्वपरिग्रहकाणामनुभवतीति भावः उक्ता यमसिद्धयः अधुना नियमसिद्धय उच्यंते शौचात्स्वां
गजुगुप्सा परैरसंसर्गः ४० यो बाह्यशौचसिद्धः तस्य स्वांगे कायेऽशुद्धिमपश्यतो जुगुप्सा भवति अशुचित्व
भावोयं कायः नाशाहंकारः कार्य इति शौचपरस्य ममकायो न शुद्ध्यति किमुतमन्नपक्वोपहृतिरेवदर्शि
नः परकायैरसंसर्गो भवतीत्यर्थः एवं बाह्यशौचसिद्धिमुक्त्वांतःशौचसिद्धिमाह सत्त्वशुद्धिसौमनस्यैकाग्र्ये
न्द्रियजयात्मदर्शनयोग्यत्वानि च ४१ शौचादित्यनुवर्त्तते भवंतीति वाक्यशेषः शुद्धिः सत्त्वस्य प्रकाशात्मनो मलैः
षादिभिरध्वंसः शुद्धिः ततः सत्त्वोत्कर्षः ततः ऐकाग्र्यं ततो बाह्येंद्रियजयः ततः पुरुषख्यासहत्वमिति विभागः
संतोषादनुत्तमसुखलाभः ४२ तस्माश्चयसिद्धोऽवश्यस्य निष्कामस्य निरतिशयस्सुखानुभवो भवति शुद्धस
त्वोत्कर्षात् तथा च महाभारते ययातिगीता यच्च कामसुखं लोके यच्च दिव्यं महत्सुखं तृष्णाक्षयसुखस्यै
ते नार्हतः षोडशीं कलामिति कायेंद्रियसिद्धिरशुद्धिक्षयात्तपसः ४३ स्वधर्मकृच्छ्चांद्रायणादिना क्लेशपापा

यो॰सू॰ क्षयात् कायस्याणिमादिसिद्धिरिंद्रियाणां दूरसूक्ष्मार्थग्राहकत्वसिद्धिर्भवतिस्वाध्यायादिष्टदेवतासंप्रयोगः
२५ ४४ इष्टमंत्रादिजपात्तस्येष्टदेवतायाः संभाषणादिसिध्यतिसमाधिसिद्धिरीश्वरप्रणिधानात् ४५ ईश्वरार्पित
सर्वभावस्यभक्त्यैवयोगसिद्धिर्भवतिनचेवंसतियमादिसर्वांगवैयर्थ्यंस्यादितिवाच्यं अंगैर्भक्त्यावायोगसि
द्धिरितिविकल्पाभ्युपगमात् तदुक्तंईश्वरप्रणिधानाद्वेतितत्रभक्तिपक्षेयमैर्यत्पूर्वंयमादीनांभक्त्यंग
त्वसंभवात् तेषांभक्तियोगाभयार्प्यत्वंदृष्टः इष्टिपक्वान्नभयार्प्यत्ववत् अविरुद्धं नचांगानामभावप्रयुक्तत्वेन
रेवयोगसिद्धेः किंभक्त्येतिवाच्यं भक्तिहीनोयायैर्दूरे योगसिद्धिः भक्त्यासक्तवर्णिभिरासन्नतमायोगसिद्धिरिति
स्वीताशिरोयोगत्रयफलप्राप्तिसाधनत्वेनविकल्पोपपत्तेः सार्वेश्वरेभक्तिःप्रसंगात्संयोगविषयभिन्नविषये
त्विवहिरंगत्वाचोपयुक्तिरिमनवद्यएवंयमनियमान्सहसिद्धिभिर्निरूप्यआसनस्वरूपमाह स्थिरसुखमा राम॰
सनं ४६ निश्चलंसुखावहंचयदासनंतद्योगांगमित्यर्थः आस्यतेनेनेत्यासनंतद्द्विविधंबाह्यंयथाशास्त्रेत्व २५
च्चैलाजिनकुशोत्तरं बाह्येण ॥ पद्मस्वस्तिकादीनिविशेषः तत्रपद्मासनंप्रसिद्धंस्वस्तिकमाकुंचितचरणं
दक्षिणंजंघोर्वंतरेदक्षिणंचसव्यजंघोर्वंतरेनिक्षिपेदितिस्वस्तिकासनंनिक्षिप्यसनंहेपादतजेद्वृषणासमी

येसंपुटीकृत्यसंपुटोपरिपाणिसंपुटिकोत्सेदितिभद्रासनंद्रष्टव्यम् सप्रसाधनस्थैर्योपायमाहप्रयत्नशै
थिल्यानंतसमापत्तिभ्यां ४७ ।स्वाभाविकः प्रयत्नश्चलत्वादासनविघातकः तस्योपरमेणासनंसिध्यति येन
नांगमेजयोभवतिअनंतेनागनायकेस्थिरतरफणासहस्रविधृतविश्वंभरामंडलेचित्तस्यसमापत्त्यादेहाभिमा
नाभावेनासनदुःखास्फूर्त्यासनंसिध्यति तत्सिद्धिलिंगमाहततोद्वंद्वानभिघातः ४८ आसनजयात्शी
तोष्णादिभिर्घातंनभवतीतिप्रसंगात्आसनसाध्यप्राणायामस्वरूपमाहतस्मिन्सतिश्वासप्रश्वासयोर्गतिविच्छेदःप्रा
णायामः ४९ आसनस्थैर्येसतिबाह्यस्यकौष्ठ्यस्यवायोरंतर्बहिर्गतिविच्छेदःप्राणायामइत्यर्थःसामान्यलक्षणं।
मुक्त्वास्यप्राणायामस्यविभजते बाह्याभ्यंतरस्तंभवृत्तिर्देशकालसंख्याभिःपरिदृष्टोदीर्घःसूक्ष्मः ५० प्राणा
यामश्चतुर्विधः बाह्यवृत्तिराभ्यंतरवृत्तिःस्तंभवृत्तिस्तुरीयश्चेति तत्रकोष्ठस्यवायोर्विरेचनेनबहिर्गतस्यबहिरे
वधारणंबाह्यवृत्तिःसचरेचकः बाह्यवायोःपूरणेनांतर्गतस्यांतर्धारणमभ्यंतरवृत्तिःसचपूरकः रेचनपूरण
प्रयत्नंविनाप्राणस्यकेवलविधारकप्रयत्नेनगतिविच्छेदः स्तंभवृत्तिः सचकुंभकः नायंरेचकः अंतस्थत्वान्
नापिपूरकः तप्तशिलातलनिहितजलबिंदुवत्सर्वतःप्राणस्यसंकुचितत्वेनसूक्ष्मत्वात् योहिस्थूलोंतर्निह

यो॰ सू॰
२५

ऽन्तर्देशं प्रापयति स पूरकः तस्माद्रेचकपूरकाभ्यासेन विना सहसा यत्नमात्रेण सर्वप्राणस्य कुंभकशक्तिस्तस्य घटजजलवन्निश्चलत्वेन देहेवस्थानात्कुंभकस्तृतीयः सः त्रिविधोयं प्राणायामः देशकालसंख्याभिर्दीर्घः सूक्ष्म इति परिदृष्टः तत्र रेचकस्य बाह्यो देशो विषयः प्रादेशो वितस्तिर्हस्तादिपरिमितो निर्वाते नासाग्रे इषीकातूलादिक्रियानुमितः पूरकस्यान्तर्देशः आपादतलमस्तकं पिपीलिकास्पर्शतुल्येन स्पर्शेनानुमितः स्तम्भस्य तथा ज्ञेयः कालो मात्रागणनया ज्ञेयः स्वजानुमंडलस्य पाणिना त्रिः परामर्शछोटिकावच्छिन्नः कालो मात्रा ता हि स्वस्थस्य पुंसः श्वासप्रश्वासाभ्यां मिता भवन्ति तत्र षट्त्रिंशन्मात्राभिरभ्यासः क्रमेण दीर्घ इति दृश्यते अधिकदेशकालव्यापित्वे प्राणनिरोधस्य दीर्घत्वं यथा यथा दीर्घ इति निपुणेमदृष्टपञ्छोटिकातेन यथा यथा प्राणस्य सूक्ष्मत्वेन दर्शनात् दीर्घ एव सूक्ष्म इति परिदृष्टो भवतीत्यर्थः तुरीयं प्राणायामं दर्शयति बाह्याभ्यंतरविषयाक्षेपी चतुर्थः ५१ उक्तो बाह्यो देशो विषयः आभ्यंतरविषयश्च हृदयनाभिचक्रादिः तयोराक्षेपः सूक्ष्मदृष्ट्या पर्यालोचनमुभयस्य पूर्वकालेतिमचतुर्थः स्तंभ इति तस्यापि दीर्घसूक्ष्मत्वं पूर्ववत् न चास्य कुंभकात भेदः शंकनीयः स्वकुंभकप्रकर्षाभ्यासेन जितबाह्याभ्यंतरविष

एम॰
२५

यनिश्चयं विनैव सकृत् प्रयत्नमात्रेण स्तंभवृत्तिकुंभकः तन्निश्चयपूर्वकः स्तंभवृत्तिः बहुप्रयत्नसाध्यस्तुरीय इति वैलक्षण्यमिति संप्रति चतुर्विधस्य प्राणायामस्य योगांगत्वे द्वारभूतं फलमाह ततः क्षीयते प्रकाशावरणम् ५२ प्राणायामाभ्यासात्प्रकाशशीलस्य बुद्धिसत्त्वस्य पिधानं क्लेशपापाख्यं क्षीयते तदुक्तं मनुना सर्ववृत्तेन प्राणायामैर्दहेद्दोषास्त्विति किंच धारणासु च योग्यता मनसः ५३ प्राणायामादावरणस्यपेहति मनसः सूक्ष्मत्वस्य धारणासु योग्यता भवतीत्यर्थः उक्तयमादिभिः संस्कृतस्य चित्तस्य प्रत्याहारो भवतीति मत्वा तल्लक्षयति स्वविषयासंप्रयोगे चित्तस्य स्वरूपानुकार इवेंद्रियाणां प्रत्याहारः ५४ शुद्धचित्तस्य प्रत्याहारविधिः स्वविषयासंप्रयोगे सति वैराग्याद्विषयेभ्यो विमुखमन्तराभिमुख्ये सतीति यावत् इंद्रियाणां चक्षुरादीनां चित्तस्वरूपानुकारः स्वविषयाःसंप्रयोगेन तत्ताभिमुख्यरूपः सप्रत्याहारः इंद्रियाणि विषयेभ्यः प्रातिलोम्येनाहृत्य तस्मिन्निति युसन्ने इंद्रियाणां विषयग्रहणं चित्तवत्तत्ताभिमुख्येनास्तीति पातनार्थः इवशब्दः यथा मक्षिका मधुकरराजानं चलंतमनुचलंति स्थितमनुस्थिता भवन्ति तथा चित्तानुमाणीन्द्रियाणि चित्तनिरोधेनैव निरुध्यन्ते न यत्नांतरेणेति तात्पर्यं ५४ प्रत्याहारस्य योगाद्भुतं फल

यो॰ सू॰
२६

त्समाह ततः परमा वश्यतेंद्रियाणां ५५ अनिषिद्धविषयसेवाविषयेंत्रत्वेविनास्वेछ्याभोगः रागद्वेषाभावे
सुखदुःखानुसारक्लेशब्दादिदर्शनमिंद्रियाणां वश्यताः परमा विषयार्थानिविषयोगात् यानुविषयैः स्वा।
भिमुखंनीयमानानामपींद्रियावत्नानांतत्त्वप्रतिपन्नात्वेनविषयेष्वस्यतमप्रतिपत्तौएवरोनस्त्राभिमुख्य
नीयमानानायाश्चपिमुखीभावोनायाश्चरामव्रतत्वेनएकसमाधमाःप्रतिपत्तिरवश्यतायामेतिजैगीषव्यःअस्मात्तादि
द्रियाणांपरमावश्यतामवतीमर्थः इतिसाधनपादः समाप्तः २ एवंद्वितीयपादेक्लेशतनूकरणद्वारयोग
साधनंक्रियायोगनिरूप्यसप्रपंचंक्लेशाकर्मविपाकानुक्त्वातेषांहेयत्वाज्ज्ञापंदुःखत्वंदर्शयित्वाहेयतद्धेतुमोक्ष
तद्धेतूनुपन्यस्ययोगस्यबहिरंगयमादिपंचकंसावांतरफलकंनिरूपितंसंप्रतिधारणादित्रितयमंतरंगंसं
यमसंज्ञंवदन् संयमसंज्ञाविभक्तये अंतरंगएकैवल्यफलकयोगप्रवृत्तिहेतवोवक्तव्या इतिपादांतरमार
भमाणोधारणांलक्षयतिदेशबंधश्चित्तस्यधारणा १ नाभिचक्रहृदयनासाग्रादौदेशेसंप्रज्ञातयोगाभि
रूपेचित्तस्ययोबंधःस्थिरीकरणंसाधारणेत्यर्थः तदुक्तंविष्णुपुराणे प्राणायामेनपवनंप्रत्याहारेणचेंद्रियं
वशीकृत्यततःकुर्याच्चित्तस्थानंशुभाश्रये मूर्त्तंभगवतोरूपंसर्वोपाश्रयनिस्पृहं एषावैधारणाज्ञेयायच्चित्तं

राम॰
२६

तत्रधार्यते तच्चमूर्त्तंहरेरूपंयादृक्चिंत्यंनराधिप तच्छ्रूयतामनाधारेधारणानोपपद्यते प्रसन्नवदनंचारुपद्मप।
त्रनिभेक्षणं सुकपोलंसुविस्तीर्णललाटफलकोज्ज्वलं समकर्णांतविन्यस्तचारुकुंडलभूषणं कंबुग्रीवंसु
विस्तीर्णश्रीवत्सांकितवक्षसं वलीत्रिभंगिनामग्ननाभिनाचोदरेणवैप्रलंबाष्टभुजंविष्णुमथवापिचतु
र्भुजं समस्थितोरुजंघंचसुस्थिरांघ्रिकरांबुजं चिंतयेद्ब्रह्मभूतंतंपीतनिर्मलवाससमिति १ धारणासा
ध्यंध्यानंलक्षयति तत्रप्रत्ययैकतानताध्यानं २ यत्रधारणाश्रिताचीप्रवृत्तिपरिहारेप्रत्ययेसाभवति
तत्रैवप्राप्तस्यानांवृत्तीनामेकतानता प्रत्ययांतरेस्यैकविषयता तद्ध्यानमित्यर्थः तद्रूपप्रत्ययस्यापेका
संततिश्चान्यनिस्पृहातद्ध्यानंप्रथमैरंगैःषड्भिर्निष्पाद्यतेनृपेतितत्रैवोक्तंध्यानांतरिकाजनकंप्रतिकेशिध्व
ने २ समाधिंलक्षयति तदेवार्थमात्रनिर्भासंस्वरूपशून्यमिवसमाधिः ३ अतिस्वच्छचित्तवृत्तिप्रवाहरूपं
ध्यानमेवार्थमात्रस्वरूपेणनिर्भासमानंसमाधिः मात्रेणार्थमाह स्वरूपशून्यमिवेतिध्यानस्वरूपज्ञानशून्य
स्वभावेनध्यानसमस्तांद्योतयति यथात्यच्छस्फटिकमणिःकुसुमरूपेणैवनिर्भासतेनस्वरूपेणतद्वदि
त्यर्थः विजातीयवृत्त्यविच्छिन्नाधारणाअविच्छिन्नंध्यानंध्येयध्यानध्यातृस्फूर्त्तिशून्यःसंप्रज्ञातोवृत्तिभेदः ३

धारणाध्यानसमाधित्रयस्य व्यवहारलाघवफलां संयमसंज्ञामाह त्रयमेकत्र संयमः ४ एकविषयं त्रयं सं
यमसंज्ञं भवतीत्यर्थः ४ संयमस्य फलमाह तज्जयात्प्रज्ञालोकः ५ तस्य संयमस्य जयात्स्थैर्योत्पत्त्या पाटवे स
माधिजायाः आलोको नैर्मल्यं भवति प्रज्ञा निःसंशयादिमलशून्या ध्येयतत्त्वस्फूर्तिर्भवतीत्यर्थः ५ क्वपुनर्नि
युक्तस्य संयमस्येदं फलमिति प्रश्नस्योत्तरं पठति तस्य भूमिषु विनियोगः ६ स्थूलसूक्ष्मादिभूताः सवि
तर्का निर्वितर्का सविचारा निर्विचाराद्याः संप्रज्ञातयोगावस्था एव भूमयः तासु संयमस्य विनियोगः
संयमेन पूर्वभूमिं जित्वानन्तरभूमिं जिगीषेत् नहि स्थूलमसाक्षात्कृत्य सूक्ष्मं साक्षात्कर्तुं शक्यमिति भा
वः ६ ननु योगाङ्गानामङ्गपञ्चकं पूर्वपादे निरूपितं त्रयमत्र निरूपितं तत्र को हेतुरित्यत्राह त्रयमन्तरङ्गं
पूर्वेभ्यः ७ पञ्चयमादीनि संप्रज्ञातसमाधेः प्रतिबन्धकस्य चित्तकायप्राणेन्द्रियमलस्य निवृत्तिद्वारा एव हि
रङ्गानि धारणादित्रयं त्वङ्गिनः समानविषयतया साक्षादन्तरङ्गयोपकारकत्वादन्तरङ्गं अतः पूर्वेभ्यः पञ्चभ्य
इदं त्रयमन्तरङ्गमिति कृत्वा तत्तद्भूमिविनियोगोक्त्यर्थमत्र निरूपितमित्यर्थः ७ तदपि बहिरङ्गं निर्बीजस्य ८
असंप्रज्ञातस्य धारणादित्रयमपि बहिरङ्गम् अङ्गिनो निर्विषयत्वेन त्रयस्य सविषयत्वेन समानविषयता

भावात् अतो व्युत्थानरूपस्य त्रयस्य संप्रज्ञातपरिपाकप्रज्ञाप्रसादरूपपरवैराग्यद्वारा निरोधे सति संप्रज्ञा
तस्यापि निरोधान्निर्बीजो भवतीति पारम्पर्येणोपकारकत्वाद्बहिरङ्गमित्यर्थः ८ संप्रति संयमाद्भूतीर्वक्तुका
मः संयमस्थलस्यार्थपरिणामानुद्दर्शयति व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्ता
न्वयो निरोधपरिणामः ९ व्युत्थानं संप्रज्ञातः स निरुध्यते येन तत्सा वैराग्यं निरोधः तत्र यदा व्युत्थानसंस्का
रस्याभिभवो निरोधसंस्कारस्य प्रादुर्भावश्च प्रवृत्तस्तदा निरोधसंस्कारस्यासंप्रज्ञातस्य क्षणेनावसरेणए
कं चित्तं भवति तस्य निरोधक्षणस्य चित्तस्य धर्मिणस्त्रिगुणत्वेन चलस्य सदा परिणामशीलस्याभिभूतप्रा
दुर्भूतयोः संस्कारयोर्धर्मित्वेनान्वयः स निरोधात्मकः परिणाम इत्यर्थः परवैराग्यरूपव्युत्थासंप्रज्ञानवृत्तेः तत्
संस्कारेण तत्संस्कारस्य चाभिभवे सति परवैराग्यसंस्कार एवाभिव्यक्तः सन्निर्बीजनिरोधपरिणाम इति
भावः ९ सर्वात्मना व्युत्थानसंस्काराभिभवे सति निरोधस्थैर्यमाह तस्य प्रशान्तवाहिता संस्कारात् १० निरोध
संस्कारप्रचयान्निरस्तसमस्तव्युत्थानसंस्कारमलस्य चित्तस्य निरोधसंस्कारपरम्परामात्रवाहिता भवति ननु त
र्हि चलमेव तदापि चित्तमस्तु तदापि तादृशीपरिणाममालास्थैर्यमित्यन्तरनिभावः १० एवं निर्बीजावस्थामु

यो॰ सू॰ त्का संप्रज्ञातपरिणाममाह सर्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधिपरिणामः ११ चित्तस्य सर्वार्थताना
२८ नार्थाकारत्वं विक्षिप्तत्वरूपो धर्मः एकाग्रता वक्ष्यमाणो धर्मः तयोर्यथाक्रमं क्षयोदयौ तिरोभावप्रादुर्भावौ न
प्रतो विनाशो नात्यन्तउत्पत्तिः तौ समाधिपरिणाम इत्यर्थः अभ्यासेन विक्षेपासयेस्य मेकाग्रता स्थैर्ये समा
धिरिति भावः ११ शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणामः १२ शान्तो अतीतः उदितो वर्त्तमानः तावे
कविषयत्वेन तुल्यौ च तौ प्रत्ययौ च तुल्यप्रत्ययौ चित्तस्य नैरंतर्येणावृत्तिरूपमेकविषयमेकाग्रताख्यः परिणा
म इत्यर्थः अयमेकाग्रता द्वादशगुणा धारणा भवति द्वादशगुणा धारणा ध्यानं द्वादशगुणं ध्यानं समाधिः
द्वादशगुणः समाधिः संप्रज्ञाताख्यो योग इति भेदः १२ मनः परिणामेषु निरोधसमाध्येकाग्रतात्मकस्मा
यमस्य त्रातिदिशति एतेन भूतेन्द्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याताः १३ भूतेषु पृथिव्यादिषु ध एम॰
र्मिषु वस्तुणादींद्रियेषु च परिणामस्त्रिविधः धर्मपरिणामो लक्षणपरिणामोऽवस्थापरिणामश्चेति एतेन २८
मनः परिणामव्याख्यानेन व्याख्याता भवन्ति तथाहि मृदः पिंडरूपधर्माऽभिभवे सति घटरूपो धर्मः प्रादुर्भवति
यथा चित्तस्य व्युत्थानक्षये निरोधोद्भवः सोऽयं धर्मपरिणामः लक्षणपरिणामः यं धर्ममावर्त्तयतीति लक्षणं का

लत्रयम् अनागतो वर्त्तमानोऽतीतोऽध्वेति कालत्रयमेवाध्वत्रयमित्युच्यते तत्र तद्धर्मस्य घटस्यानागतत्वं
प्रथमोऽध्वा वर्त्तमानत्वं द्वितीयोऽध्वा अतीतत्वं तृतीयोऽध्वा सोऽयं लक्षणपरिणामः अनागतत्वं हि धर्मो वर्त्तमाना
तीतधर्माभ्यामावर्त्तयति एवं वर्त्तमानत्वादिकमपि लक्षणमेतव्यं एवं लक्षणपरिणामस्य तदवच्छिन्न
स्य धर्मस्य चावस्थापरिणामो द्रष्टव्यः यथा आगामिकल्पभावी अनागततमः एतत्कल्पभाव्यनागततरः
ज्योभावी अनागतः सद्यो जातो वर्त्तमानतमः उत्पाद्यं तथा वर्त्तमानस्य नवत्वपुराणत्वादयोऽवस्थापरिणा
मः एवं प्रतिक्षणपरिणामिनः सर्वे भावा ऋते चितिशक्तेरिति संक्षेपः १२ यस्यायं त्रिविधः परिणामः तं धा
र्मिणं दर्शयति शान्तोदिताव्यपदेश्यधर्मानुपाती धर्मी १४ शान्ताः कृतव्यापाराः अतीताः उदिताः जलाह
रणादिव्यापाराविष्टाः वर्त्तमानाः अव्यपदेश्याः शक्तिरूपेण मृदादिषु धर्मिषु स्थिताः अनागताः तेहि स्वस्मते
पा धर्मिणो धर्मान्तरात्मभेदेन व्यपदेशेन व्यपदेष्टुं पार्यन्ते अत एव सर्वकार्यं शक्तिरूपेणाव्यपदेश्यकार
णामत्र संभावितमिति सर्वकारणं सर्वकार्यात्मकं भवति दृश्यते हि दावदग्धवेत्रबीजात्कदलीस्तंबोद्भवः न
हि तत्रासत उद्भवः संभवति अभिव्यंजकानां देशकालकर्मादीनां वैचित्र्यात्कचित्किंचिदेवोद्भवतीति लोके का

यो॰ वृ॰ र्यकारणाद्यवस्था योगसिद्धानां देशादिप्रतिबंधाभावात्सर्वस्मात्सर्वमुद्भवति तानेतान् शांतोदिताव्यपदेश्यान्घ
२९ टीयंत्रवदनिशमावर्त्तमानान्सोऽनुपतति अन्वेति सोऽनुपाती धर्मी यथा मृत्सुवर्णादिश्चूर्णपिंडघटरुचकाद्यन्व
यी धर्मीत्युच्यते १४ नन्वेकस्य धर्मिणः परिणामबहुत्वं को हेतुरित्यत आह क्रमान्यत्वं परिणामान्यत्वे हेतुः १५
मृच्चूर्णपिंडरूपः पिंडघटरूपो घटकपालरूपः पौर्वापर्यरूपक्रमस्तस्यान्यत्वं दृश्यमानमेकस्या एव मृदः परिणामानां
चूर्णादीनां धर्माणामन्यत्वे हेतुर्ज्ञापकः एवमनागतवर्त्तमानातीताध्वानां क्रमाल्लक्षणपरिणामान्यत्वं धर्मा
णां ज्ञेयं तथा क्षणपरंपराया घटक्षीत्स्यादीनां दुर्ज्ञेयस्य सूक्ष्मपरिणामक्रमेणानवत्वपुराणत्वाद्यवस्थापरि
णामान्यत्वं बोध्यं दृश्यते हि कुसूलांतरस्थितव्रीहीणां कालेन पाणिस्पर्शमात्रेण चूर्णावस्था न हीयं क्षणि
कपरिणामक्रमं विना नवानां वा तादृशानामकस्माद्भवति तस्माद्धर्मिणः परिणामनिमित्तस्य धर्मा भिन्नाः ध राम॰
र्माणां लक्षणानि तेषामवस्था इति स्थितं धर्म्यनन्यत्वान्न क्षणिकत्वादित्यनघं तत्र केचित्परिणामा २९
श्चित्तस्य प्रत्यक्षाः कामसुखादयः केचित्त्वागमानुमानगम्याः यथा तदुक्तं भाष्ये निरोधकर्मसंस्काराः परिणा
मोऽपि जीवनं चेष्टाशक्तिश्च चित्तस्य धर्मा दर्शनवर्जिता इति परोक्षाश्चमर्थः कर्मपुण्यापुण्यापूर्वं त्रिगुणत्वाच्चित्त

स्य प्रतिक्षणपरिणामोऽनुमेयः जीवनं श्वासादिलिंगगम्यं प्राणधारणं चेष्टाक्रिया चित्तस्यागाच्चेष्टागम्या
कार्याणां सूक्ष्मावस्था शक्तिः १५ एवं संयमधर्मस्य विषया धर्मादयो निरूपिताः संप्रत्यापादसमाप्तेः संयम
स्य तत्तद्विषयमेव वशीकारज्ञानाय विभूतय उच्यंते परिणामत्रयसंयमादतीतानागतज्ञानं १६ चित्तसत्त्वे हि
त्यतः सर्वप्रकाशस्वभावं ज्ञानं तमोमलप्रतिबंधस्य संयमेन निवृत्तौ समस्तं प्रमाणमनपेक्ष्य सर्वं जाना
तीति स्थितिः तत्रास्मिन्धर्मिण्येते धर्माः अनागतादयः एतेऽध्वानः एताश्चावस्था इति धर्मलक्षणा
वस्थारूपपरिणामत्रयसंयमाद्योगिनोऽतीतानागतवस्तुसाक्षात्कारो भवतीत्यर्थः शब्दार्थप्रत्ययाना
मितरेतराध्यासात्संकरस्तत्प्रविभागसंयमात्सर्वभूतरुतज्ञानं १७ वर्णातिरिक्तो वर्णैर्व्यंग्यो नित्यो नि
र्भागः शब्दः स्फोटः स द्विविधः गौरित्येकं पदमिति श्रोत्रग्राह्यः पदस्फोटः गामानयेत्येकं वाक्यमिति ग्राह्यो
वाक्यस्फोटः न च क्षणिकानेकवर्णेष्वेकत्वप्रत्ययस्य बुद्धिः तथा हि गौरित्यत्र यो वर्णगणः पूर्वोऽपि यः परेषु
विद्यमाने गकारौकारविसर्जनीये विज्ञानातीयस्फोटत्रयमञ्जनकैः सदृशा भवति तुल्यस्थानत्वात् तदुक्तं च
ष्टौ स्थानानि वर्णानामुरः कंठः शिरस्तथा जिह्वामूलं च दंताश्च नासिकौष्ठौ च तालु चेति एवं स्पर्शानां स्पृष्ट

यो॰ वा॰ हृप्रयत्नः सगणागृह्यमाणो व्यविहृतमित्यादिप्रयत्नस्यादृष्टपूर्वत्वम् तथा च प्रयत्नविशेषयुक्तस्योदानवा
३० योः सूक्ष्मस्थाने संयोगे सत्त्वसूक्ष्मस्थानस्थेन वागिन्द्रियेणोत्पद्यमाना गकारादयो वर्णा ध्वनिभेदेन श्रोत्रप्रत्यक्षा
श्च भवेयुः प्रत्येकं गोपदस्फोटव्यंजकं ततो गकारादिस्फोटैः सदृशमव्यक्तं व्यंजयन्ति स्वनिष्ठसादृश्यानां च्य
ग्ये समारोप्य पुनर्गकारादयः क्रमवर्तिनः स्वानुभवजनितसंस्कारसहितश्रोत्रजज्ञानमात्रमेकस्यां बु
द्धौ भासमानत्वेन मिलिताः स्वस्फोटं तत एवाखण्डं व्यक्तं च — तरंगोपदस्फोटं निर्भागमपि स्वघटितादात्म्येनारोपि
तसादृश्यात्मकभागवन्तमः क्रमेनित्यमपि सक्रममनित्यमिव व्यंजयन्ति मलिनवर्णकादर्शो निर्मलमपि
मुखं स्वसादृश्यमारोप्य मलिनवक्रमिव यथा व्यंजयति तद्वत् एवं वर्णाभिव्यक्तः स्फोटोऽर्थबोधकः न च
वर्णार्थस्येव प्रत्येकमव्यक्तामेलनेन समस्तवर्णाभिव्यक्तिरस्तु किं स्फोटेनेति वाच्यम् व्यक्ताव्यक्तत्वस्य प्रत्ये राम॰
स्तत्तानधर्मस्य परोक्षार्थतानुपपत्त्या योगादेकपदमेकं वाक्यमिति स्फोटज्ञानं श्रोत्रजप्रत्यक्षमिति तस्यैव ३०
व्यक्ताव्यक्तत्वेन तस्य लेखितरेणास्य शब्दस्यार्थप्रत्ययाभ्यामभेदेन विकल्पिते संकीर्णोऽर्थः केनाग्रहीतो
कस्येति पूर्वं प्रतिपादितम् तथा गौरिति शब्दो गौरित्यर्थो गौरिति प्रत्यय इत्याबालपण्डितं प्रोक्तार्थप्रसेषा

नामितरेतराभेदाध्यासात्संकरः प्रसिद्धः तेषां शास्त्रयुक्तिभ्यां यः प्रविभागः प्रसिद्धः वर्णाश्रयं पदं पदाश्रयं
वाक्यं शक्त्यादिवृत्त्या बोधकमिति शब्दतत्त्वम् अर्थो द्रव्यगुणकर्मजात्यादिर्वाच्यो लक्ष्यश्चेत्यर्थतत्त्वं शाब्दज
न्योऽर्थविषयो बुद्धिप्रत्यय इति ज्ञानतत्त्वमिति गोशब्दवत् सर्वत्र विभागो ज्ञेयः तस्मिन्विभागे संयमात्सर्वेश
ब्दादिवर्णाकारस्य चक्रं सर्वभूतानां पशुपक्ष्यादीनां रुतज्ञानं भवति इममर्थमेते वदन्तीति संयमी जाना
तीत्यर्थः संस्कारसाक्षात्करणात्पूर्वजातिज्ञानं १८ अनुभवक्लेशजाः स्मृतिक्लेशहेतवः कर्मजाः सुखदुः
खहेतवश्चेति द्विमे संस्काराः ते चित्तस्य धर्माः पूर्वजन्मपरंपरासंचितास्तेषु श्रुतेष्वनुमितेषु च संयमेन सा
क्षात्कृतेषु तद्धेतुत्वेन स्वीयपरकीयपूर्वजन्मपरंपरायाः साक्षात्कारो भवतीत्यर्थः अत्र भगवान् जैगीषव्य
उदाहरणं तस्य किल योगैश्वर्यस्य प्रकृतिवशिनः संस्कारसाक्षात्कारात् दशसु महाकल्पेषु देवतिर्यङ्नरा
दिषु निजजन्मपरंपरां साक्षात्कृतवतो विवेकख्यातिश्च प्रादुरभवत् तं भगवान् आवट्यः पप्रच्छ भग
वन् त्वया दृष्टेषु दशकल्पेषु सुखदुःखयोः किमधिकमनुभूतं जैगीषव्य आह हंत भो आयुष्मन् देवनरादिषु
पुनः पुनरुत्पद्यमानेन यत्किंचिदनुभूतं मया तत्सर्वं दुःखमेवेति आवट्यः आह किं प्रकृतिवशित्वमपि दुः

त्वमेव येन दिव्याभोगाश्च स्वपाः संकल्पमात्रेणोपतिष्ठंत इति स उवाच सत्यं लौकिकसुखापेक्षया प्रधा
नवशित्वमनुत्तमं परं कैवल्यापेक्षया दुःखमेव यतस्तृष्णातंतुरनुच्छिन्नः सर्वदुःखाकरः तद्विच्छेदात्कैव
ल्यसुखे प्रसन्नमनुत्तममिति भाष्यस्याख्यायिका ननु यत्र संयमस्तस्य साक्षात्कार इति नियमात्कथं सं
स्कारसंयमात्पूर्वजन्मज्ञानमिति चेत्तत्संस्कारानुबंधसंस्कारसंयमात्तदनुबंधत्वेन पूर्वजन्मनो ज्ञानमुपपन्न
मिति मंतव्यमित्यंतरमाह प्रत्ययस्य परचित्तज्ञानं १९ प्रत्ययस्य परचित्तस्य संयमात्तत्साक्षात्कारो भवती
त्यर्थः किं संस्कारसाक्षात्कारेण तदनुबंधवत्तानवमाश्चित्तसाक्षात्कारेण तदालंबनज्ञानं भवतीत्याह न च सा
लंबनं तस्याविषयीभूतत्वात् २० परचित्तमात्रं साक्षात्क्रियते चात्वर्थः सालंबनं सविषयं तु न साक्षात्क्रियते
तस्य सालंबनस्याज्ञातत्वात् लिंगादिना ज्ञाते हि संयमप्रवृत्तिः नाज्ञाते तथा च यथा संस्काराणां संस्कारत्वलिंगे
न जन्मांतरे पद्यंते तदप्युपपद्यते हिंस्राहिंस्रे मृदुक्रूरे तस्मात्तत्तस्य रोचते इत्याद्यागमेन च जन्मांतरानुबं
धित्वज्ञानं शक्यं तथा परस्य चित्तममुकविषयमिति ज्ञातुमेवकं लिंगाद्यभावात् चित्तमात्रं तु परस्य हर्षादिलिं
गेन सुज्ञानं यदि परचित्तं ज्ञात्वा संयमेन साक्षात्कुर्यात्तदानीं किमालंबनमिति तच्चित्तप्रणिधानेन तदा तत्कालीन

सालंबनं जानाति रागादिदृष्ट्या तु चित्ताभेदात्साक्षात्क्रियंत इति विशेषः सिध्यंतरमाह कायरूपसंयमात्तद्ग्राह्य
शक्तिस्तंभे चक्षुःप्रकाशासंप्रयोगेंतर्धानं २१ कायस्य यद्रूपं चाक्षुषत्वप्रयोजकमस्ति तस्मिन्संयमात्तस्य रूप
स्य परवृत्तिग्राह्यत्वानुकूलायाः शक्तेः स्तंभे प्रतिबंधे सति यश्चाक्षुषज्ञानाविषयत्वे जाते तदंतर्धाने योगिदेहस्याचा
क्षुषत्वं यथाकामं सिध्यतीत्यर्थः एतेन तदीयशब्दस्पर्शरसगंधानां संयमाच्छ्रोत्राद्यग्राह्यत्वसिद्धिरुक्ता भवतीति वि
भूत्यंतरमाह सोपक्रमं निरुपक्रमं च कर्म तत्संयमादपरांतज्ञानमरिष्टेभ्यो वा २२ पूर्वजन्मकृतमिदानीं स्थितक
र्म द्विविधं सोपक्रमं निरुपक्रमं च फलदानायायुक्तं शीघ्रविपाकं च सोपक्रमं सातपदेशप्रसारितेनार्द्रव
स्त्रेण शीघ्रं शुष्यता तुल्यं कालांतरे फलप्रदमिदानीं निर्व्यापारं चिरविपाकं निरुपक्रमं निरातपदेशे पिंडी
कृतार्द्रवस्त्रतुल्यं तत्र संयमेऽस्य साक्षात्कारात्तद्विपाकस्यायुषोऽवसानसमयांतं शरीरे ज्ञायते यतो परस्य प्रजापते
रितो महाप्रलयः नरादीनां मरणमपरांतः तस्य ज्ञानममुष्मिन्देशेऽमुककाले मदेहवियोग इति साक्षात्कारः
तत्र सोपक्रमकर्मसाक्षात्कारे तद्विपाकस्य दृष्टिति भोगार्थं बहुशरीराणि गृहीत्वा योगी स्वेच्छया म्रियते एके
न त्वभोगेन मरणविलंबः प्रसंगादाह अरिष्टेभ्यो वेति तत्राध्यात्मिकारिष्टानि करपिहितकर्णो घुटस्वप्राणयो

यो·सू
३२

चाग्रहणादीनि आधिभौतिकानि यमभटदर्शनादीनि आधिदैविकान्यकस्मात्स्वर्गदर्शनादीनि एतान्यरिष्टान्या
पतीत्यरिष्टानि त्रिविधानि मरणलिंगानि तेभ्यो मरणज्ञानं भवतीदं चायोगिनोपीत्यर्थः मैत्र्यादिषु बलानि २३ मै
त्रीकरुणामुदितासु संयमो विहितस्तेन तासां बलानि वीर्याणि भवंति मैत्रीयोगी प्राणिमात्रस्य सुखकरः सु
दुःखनिर्दुःखोद्धर्त्ता भवति अपस्यपातीव भवति उपेक्षातो द्वेषीत्यमात्रेन तस्य बलं किंचिद् स्निसंयमाभा
वादित्यर्थः बलेषु हस्तिबलादीनि २४ हस्तिहनुमद्गरुडादिबलेषु तद्भावेन संयमात्तानि बलानि योगिनः प्रा
दुर्भवंति विशेषस्सितः सर्वसामर्थ्यादित्यर्थः प्रवृत्त्यालोकन्यासात्सूक्ष्मव्यवहितविप्रकृष्टज्ञानं २५ ज्योतिष्म
ती प्रवृत्तिः प्रागुक्ता तस्याः ज्योतिः सा सात्त्विकारूपप्रवृत्तेर्यस्त्वालोकः आस्पदं सर्वतो विप्रसरं न निर्मलबुद्धिसत्त्वं
तस्य तस्मिन्यमाणको सूक्ष्मव्यवहितनिधानादौ विप्रकृष्टे मेर्वंतरवर्तिरसायनादौ न्यासात्तस्मिन्पात्रे तज्ज्ञानं ता·
साक्षात्कारो भवति सोऽयमालोकसंयोगात्प्रसादित्तानवदित्यर्थः एवं संयमेन साक्षात्कृततत्त्वालोकरूपाभौ ३२
तिकतानप्रस्फासो ह्यालोकरूपादित्यर्थः भुवनज्ञानं सूर्ये संयमात् २६ दिविदेदीप्यमानमार्तंडमंडले सुषु
म्णादिद्वारके सहस्ररश्मिमालिनि संयमात् भूरादिसप्तभिन्नविचित्रचतुर्दशभुवनानि साक्षात्करोतीत्यर्थः चंद्रे तारा

व्यूहज्ञानं २७ चंद्रे संयमात्तस्य ताराणां सन्निवेशविशेषं साक्षात्करोति सूर्यप्रकाशस्याभिभावकत्वात्तत्संयमात्
न ताराज्ञानं भवतीति भावः ध्रुवे तद्गतिज्ञानं २८ ध्रुवे संयमात्ताराणां गतिर्ज्ञानमविच्छिन्नज्ञानेन ग्रहेण सहा
नेन पथा तारा अनेन कालेन गच्छंतीति एवं बाह्यासिद्धीरुक्ता आध्यात्मिकसिद्धीराह नाभिचक्रे कायव्यूहज्ञानं २९ का
यस्य मध्यभागे यन्नाभिचक्रं आधारलिंगचक्राभ्यां चतुःषट्पत्राभ्यामुपरि स्थितं दशपत्रं तस्मिन्संयमाद्दे
हस्थं संनिवेशं जानाति वातपित्तश्लेष्माणस्त्रयो दोषास्त्वग्रुधिरमांसस्नाय्वस्थिमज्जाशुक्राणि सप्त धात
वः तेषां पूर्वपूर्वं बाह्यमित्येव कापरिमाणः कंठकूपे क्षुत्पिपासानिवृत्तिः ३० जिह्वातंतोरधस्तात्कंठः कूपाका
रः प्रदेशो क्षित्रपत्रप्राणादेः संघर्षात्क्षुत्पिपासे भवतः तत्र संयमात्तन्निवृत्तिरित्यर्थः कूर्मनाड्यां स्थैर्यं ३१ कू
पादधस्तादुरसि कूर्माकारा नाडी तत्र संयमात्तस्य चित्तस्य स्थैर्यं भवतीत्यर्थः मूर्द्धज्योतिषि सिद्धदर्श
नं ३२ शिरः कपाले छिद्रं ब्रह्मरंध्राख्यं सुषुम्णायोगाद्दृश्यस्य चित्तमतिप्रभायोगाद्वभास्वरं मूर्द्धज्योतिः तत्र
संयमात्सिद्धानद्दृश्यानपि पश्यतीत्यर्थः प्रातिभाद्वा सर्वं ३३ विवेकख्यातेः पूर्वभावि प्रसंख्यानं तस्मात्तारकं तदूर्ध्व
संयमे क्रियमाणे प्रसंख्यानोदयात्प्राक् प्रतिभया ऊहमात्रेणज्ञातं प्रातिभं ज्ञानं भवति तेनवायोगी सर्वं

यो·सू·
३३

जानाति यथोदयात्पौर्वं स्फुरणात्प्रभया लोकः पश्यति तद्वत् एतद्वार्त्तिके तु सर्वे निमित्तानपेक्षमनोमा
त्रजं संयमस्यार्थस्फुरितस्त्रूयमानं ज्ञानं प्रतिभानस्यां संयमात् प्रातिभं विवेकख्यातेः पूर्वभावि तारकमुदेति ते
न सर्वं योगी जानातीति आख्यातं तत्हृदये चित्तसंवित् ३४ अधोमुखे तत्सद्मे चित्तस्य स्थाने संयमात्स्ववासनस्य।
चित्तस्य संवित् भवतीत्यर्थः सत्त्वपुरुषयोरत्यन्तासंकीर्णयोः प्रत्ययाविशेषो भोगः परार्थात्स्वार्थसंयमात्पुरु
षज्ञानं ३५ बुद्ध्यात्मनो भोग्यभोक्तृत्वे नात्यंतभिन्नयोर्यः प्रत्ययाविशेषः बुद्धिपरिणामे सुखदुःखतमोरूपप्रत्य
ये पुरुषस्य प्रतिबिंबग्राहिभिरविशेषः सारूप्यं प्रतिबिंबद्वारा सुखाद्यारोपः स भोगो बुद्धिस्थो दृश्यत्वात्परार्थः
पुरुषस्य भोक्तुः शेषभूतत्वात्तस्मात्परार्थाद्योगाच्चित्प्रतिबिंबोपसर्जनकम् अपरूपात्तदाद्यचिन्मात्रस्वभावः प्र
तिबिंबः स्वार्थोऽनवशेषः तत्र संयमात्पुरुषस्य साक्षात्कारो भवति सोऽपि स्वप्रकाश्येन पुरुषेण दृश्यो बुद्धिस्थो
न पुरुषं विषयीकर्तुमीष्टे किंतु नात्माकारत्वशून्यत्वेनात्ममात्रप्रतिबिंबग्राहित्वात्पुरुषज्ञानमित्युच्यते तथा
च श्रुतिः विज्ञातारमरे केन विजानीयादिति संप्रत्ययस्य संयमस्य पुरुषसाक्षात्कारे तत्रागम्येवाः सिद्धीर्दर्शयति त
तः प्रातिभश्रावणवेदनादर्शास्वादवार्त्ता जायंते ३६ ततः स्वार्थसंयमात् प्रातिभं पूर्वोक्तं सर्वगोचरं ज्ञानं मनोमा

राम
३३

त्रेण योगजधर्मानुगृहीतेन जायते दिव्यानां शब्दस्पर्शरूपरसगंधानां ग्राहकाणि श्रोत्रत्वक्चक्षुर्जिह्वा
घ्राणानि क्रमेण श्रावणवेदनादर्शास्वादवार्त्तासंज्ञानि तान्यंते दिव्यशब्दग्राहकं श्रोत्रं यदा योगिनो भवति
तदा तस्य श्रोत्रस्य श्रावणमिति तांत्रिकी संज्ञा भवति तथा घ्राणस्य वार्त्तासंज्ञेत्साधूहनीयं ननु तत्संपद्योगा
कृतकृत्यस्य प्रमत्तस्यात्र ते समाधावुपसर्गा व्युत्थाने सिद्धयः ३७ ते प्रातिभादयः समाधौ निःश्रेयसफलत्वात्तस्योप
सर्गा विघ्ना भवंति अतो मुमुक्षार्थी तानपेक्षते न ह्यात्मसंबोधनं विना सिद्धिकोट्यापि कृतकृत्यता भवति
तदुक्तं पारगुरुणा श्रीकृष्णेन एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारतेति व्युत्थाने तस्य तु ताः सिद्धयो भवंती
सर्वाः ३७ तदेवं संयमस्य ज्ञानरूपा विभूतिमात्मदर्शितां तामुक्त्वा क्रियारूपामाह बंधकारणशैथिल्यात्प्रचा
रसंवेदनाच्च चित्तस्य परशरीरावेशः ३८ सर्वत्रव्यापिनस्त्वस्य चित्तस्य स्वशरीरमात्रे संकोचेन स्थितिर्बंधः तस्य
कारणं धर्माधर्मौ तयोः संयमेन शैथिल्यं भवति प्रचारस्तेन चित्तमिति प्रचारो नाडीसंघः तस्यापि संयमेन
संवेदनं अधुनानया नाड्या संचरतीति ज्ञानं भवति तथा प्राणेंद्रियमार्गनाडीज्ञानं भवति तथा च बंधकारणे
नाशे मार्गज्ञत्वस्य स्वपरक्षेपप्रवेशवच्चित्तस्य परकाये मृते जीवति वा प्रवेशो भवति चित्तमन्विंद्रियाणि विशंति

मधुकरराजमिवमक्षिकाइत्यर्थः उदानजयाज्जलपंककंटकादिष्वसंगउत्क्रांतिश्च ३९ द्वयीसकलेंद्रियाणांप्रवृ-
त्तिः बाह्यारूपाद्यालोचनरूपा आंतरीजीवनयोनिप्रयत्नरूपासर्वकरणसाधारणी अस्याःकार्यैः पंचप्राणादयः
तत्रानासिकाग्राद्धृदयंस्थितःप्राणः आनाभेःपादतलस्थितोपानोमलापनयनहेतुः सर्वदेहव्यापीव्यानः आ-
नासाग्राच्छिरोवृत्तिरुदानः उत्क्रांतिहेतुः आहृदयादानाभिस्थितःसमानःभुक्तसमनयनहेतुरितितेषुप्राणःश्रे-
ष्ठः तत्रोदानस्यसंयमेनजयाज्जलपंककंटकादिष्वसंगोयोगीलघुत्वादुपरिगच्छतीस्वेच्छयामरणंचलभतइ-
त्यर्थः समानजयाज्ज्वलनं ४० नाभिनिकटस्थाग्निमावृत्यस्थितःसमानस्तस्यवशीकारादग्नेर्ज्वलनंभवति येनाज्वल-
न्निवदृश्यतइत्यर्थः एवंप्राणादिजयात्स्वोपात्तक्रियासिद्धिर्बोध्या श्रोत्राकाशयोःसंबंधसंयमाद्दिव्यंश्रोत्रं
४१ आहंकारिकस्यापिश्रोत्रस्याकाशेनाधाराधेयभावोस्ति उपलक्षणमेतत्त्वग्वाय्वोःचक्षुस्तेजसोरपांरसन-
योःघ्राणभूम्योःसंबंधसंयमाद्दिव्यानींद्रियाणिश्रावणवेदनाद्युक्तसंज्ञानिसंभवंति यैर्दिव्यशब्दादीन्युगप-
ज्जानातीत्यर्थः कायाकाशयोःसंबंधसंयमाल्लघुतूलसमापत्तेश्चाकाशगमनं ४२ तयोःसंयोगंजित्वालघु-
नितूलादौवातन्मयभावेनसमाधिनालघुकायोभूत्वाऽसौजलेविहरतिततऊर्णनाभितंतुविहारितपश्चात्सर्व-

रश्मिषुततोयथेष्टमाकाशेगच्छतीत्यर्थः बहिरकल्पितावृत्तिर्महाविदेहाततःप्रकाशावरणक्षयः ४३
देहेऽहंभावेसत्येवमेमनोबहिरस्त्वितिकल्पनयामनसोदेहाद्बहिर्वृत्तिर्लाभोभवतिसाकल्पिताविदेहाख्या
धारणातयादेहेऽहंभावत्यागेनमनसःस्वतएवबहिर्वृत्तिर्लाभोभवतिसेयमकल्पितामहाविदेहाख्याधारणात-
तःप्रकाशस्वभावस्यचित्तस्यक्लेशकर्माद्यावरणक्षयोभवतिततःसर्वज्ञत्वलाभइत्यर्थः स्थूलस्वरूपसूक्ष्मा-
न्वयार्थवत्त्वसंयमाद्भूतजयः ४४ पंचभूतानांस्थूलंदृश्यमानमवयवसंस्थानंपृथिवीत्वादिजातिमत्क्रमे-
णैकैकन्यूनैःशब्दादिभिःपंचगुणैःस्थूलैर्युक्तमित्येकंरूपं अथद्वितीयंतेषांस्वरूपंक्रमेणकाठिन्यस्नेहो-
ष्ण्यप्रेरणसर्वगतत्वलक्षणं प्रेरणंवायोस्तृणादिवाहकत्वं अथतृतीयंतेषांरूपंसूक्ष्मंकारणंपरमाण-
वःतेषांसूक्ष्माणिपंचतन्मात्राणि अथचतुर्थंतेषांरूपंगुणत्रयंयत्स्वकार्येकारणत्वेनान्वेतीत्यन्वयःसाधा-
र्म्यं अथपंचमंतेषांभूतानांरूपमर्थवत्त्वंभोगापवर्गसामर्थ्यंगुणनिष्ठंस्वेषुगुणान्वयादागतमेवंभूतानांपंच
रूपेषुकार्यस्वरूपेतुस्थूलादिक्रमेणसंयमाद्भूतानियोगिसंकल्पानुसारीणिभवंतिवत्सानुसारिण्यइवगाव-
इत्यर्थः ततोऽणिमादिप्रादुर्भावःकायसंपत्तद्धर्मानभिघातश्च ४५ ततोभूतजयाद्योगिनोऽणिमाद्यष्टसि-

सिद्धयः प्रादुर्भवंति यथाणुत्वमणिमा विभुत्वं महिमा तूलपिंडवल्लघुत्वं लघिमा मेरुवद्गुरुत्वं गरिमा
अंगुल्या चंद्रस्पर्शनं प्राप्तिः सत्संकल्पत्वं प्राकाम्यं भूतनियंतृत्वं वशित्वं भूतस्रष्टृत्वमीशितृत्वमित्यष्टैश्व
र्याणि अत्र प्राप्त्यंतानि स्थूलसंयमात्सिध्यंति स्वरूपसंयमात्प्राकाम्यं अवशिष्टं हेतुसंयमादिति विभागः का
यसंपद्वक्ष्यते तस्य कायस्य भूतधर्मैः काठिन्यादिभिरनभिघातश्च भूतजयात्सिध्यति येन शिलांतर्विशति
शीतोष्मादयो न बाधंत इत्यर्थः रूपलावण्यबलवज्रसंहननत्वानि कायसंपत् ४६ चक्षुःप्रियं रूपं लावण्यं
सर्वांगसौंदर्यं बलं वीर्यं वज्रस्येव संहननमवयवव्यूहो यस्य स तथा तद्भावो वज्रसंहननत्वं दृढमिति प्रसि
द्धं भूतजयानंतरमिंद्रियजयोपायमाह ग्रहणस्वरूपास्मितान्वयार्थवत्त्वसंयमादिंद्रियजयः ४७ शब्दः ष
ड्जादिः स्पर्शः शीतादिः रूपं पीतादिः रसो मधुरादिः गंधः सुरभ्यादिरिति सामान्यविशेषात्मशब्दादिगो
चराः पंचवृत्तयः कार्या श्रोत्रादींद्रियाणां ग्रहणं निश्चयमनुरूपं प्रकाशकत्वं स्वरूपं तेषां द्वितीयं अस्मिता
सात्त्विकाहंकारः कारणं तेषां तृतीयं अन्वयार्थवत्त्वे चतुर्थपंचमे व्याख्याते तेषु पंचस्विंद्रियरूपेषु क्रमे
णसंयमादिंद्रियजयो भवति ततः किं तदाह ततो मनोजवित्वं विकरणभावः प्रधानजयश्च ४८ मनो

वत्कायस्यानुत्तमो गतिलाभो मनोजवित्वं देहानपेक्षाणामिंद्रियाणां दूरवासार्थज्ञाने निकारणत्वं विकरण
भावः प्रधानस्यान्वयस्य चतुर्थरूपस्य जयः सर्वजगद्वशित्वमिति सिद्धयः इंद्रियजयाद्भवंतीत्यर्थः एता अणि
माद्याः प्रधानजयांताः सिद्धयोऽस्मिन् शास्त्रे मधुप्रतीका उच्यंते मधुन एकदेशवदाःस्वादयंतीति मधुप्रती
काः मधुतुल्यास्त्वर्थः यद्वा स्थूलादिप्रधानांततत्त्वविषयायोगजन्मन्यभिमतता मधुतत्प्रतीककारणं सा
त्केन भूतेंद्रियजयद्वारेणमासांता मधुप्रतीकाः एवं संयमात्तानेकिमासिद्धयः साक्षाद्द्वारेण आविवे
कख्यातिस्पर्शाः उपन्यस्ताः संप्रति विवेकख्यातेरवांतरसिद्धिमाह सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावा
धिष्ठातृत्वं सर्वज्ञातृत्वं च ४९ पूर्वोक्तस्वार्थसंयमेन निर्द्धूतरजस्तमोमलस्यांतःकरणस्य जयेव पर्यकाले
तायामपरस्यां विरक्तोऽपि तस्य बुद्धिसत्त्वात्मनोर्भेदख्यातिर्जायते तेनात्मस्वस्य तदावृत्तिपरस्य योगिनः सर्वे
षां भावानां प्रधानतत्परिणामानां अधिष्ठातृत्वं नियंतृत्वं सर्वेषां भूतभवद्भाविनां ज्ञातृत्वं च सिध्यति एषा
विशोका नाम सिद्धिः अधुना विवेकख्यातेर्मुख्यां सिद्धिमाह तद्वैराग्यादपि दोषबीजक्षये कैवल्यं ५० तस्यां वि
शोकायां सिद्धौ वैराग्यात्तद्दो विवेकख्यातावपि वैराग्ये परं भवति ततो दोषाणां क्लेशानां बीजभूतानि संस्कार

त्तस्य स्वरूपे सर्वात्मना तिरोभावे सति चित्तस्य परवैराग्यसंस्कारशेषतायां पुरुषस्य स्वरूपप्रतिष्ठत्वं केवलत्वं सिद्ध
तिरूपसंस्कारशेषाद्योगसिद्धिः अत्र विघ्नोत्पत्तौ निरासोपायमाह स्थान्युपमंत्रणे संगस्मयाकरणं पुनरनिष्टप्रसं
गात् ५१ चत्वारः खल्वमी योगिनः प्रथमकल्पिको मधुभूमिकः प्रज्ञाज्योतिरतिक्रान्तभावनीयश्च तत्राद्यः संप
प्रवृत्तमात्रो न किंचित्सवितर्कादिकं जानाति द्वितीयः संप्रज्ञातयोगेन मधुमतीं चित्तभूमिमृतंभरप्रज्ञावस्थां
लब्ध्वा भूतेन्द्रियाणि सात्मसात्कृतानि जिगीषति तत्तुपह्नाए पूर्वोक्ताः क्रमेण मधुप्रतीका विशोका संस्कार
शेषा चेति तिस्रो भूमीर्लब्धुकामः तृतीयस्तु जितभूतेन्द्रियत्वान्महेन्द्रादिभिः सोप्योलब्धभूमिरूपा विशोका
दिभूमिरूपसिद्धाद्यविषयास्वार्थसंयमयत्नवान् चतुर्थस्तु भगवान्महानुभवे लब्धविवेकान्तभूमिद्वये विर
क्तो विघ्नशोकासंभवो जीवन्मुक्तश्च तुर्यभूमौ वर्त्तते यस्य सप्तधा प्रान्तभूमिः प्रज्ञा आम्नाता तत्राद्यस्य योगिनो
देवनिमंत्रणयोग्यता नास्ति अतः परिशेषान्मधुभूमिको योगी द्वितीयो यस्तस्य स्थानिभिः तत्र तत्स्थानस्था
निभिर्महेन्द्रादिभिरुपमंत्रणं प्रार्थनं क्रियते भो इहास्यतां स्वर्गादिस्थाने रम्यतां कमनीयेयं कन्या दिव्योप
भोगो रसायनमिदं जरामरणनिवारकमिदं कामगं यानमित्येवं प्रार्थने संगः कार्यः अहो ममापि योगप्रभाव इ

तिस्मयश्च न कर्त्तव्यः किंत्विस्येतद्दोषं भावयेत् घोरेषु संसारांगारेषु पाच्यमानेन मया जन्ममृतिप्रबंधचक्रारू
ढेन कथंचिदासादितः क्लेशकर्मांधकारविध्वंसियोगप्रदीपः तस्य चैते तृष्णायोनयो विषयवायवः प्रतिपक्षाः
स खल्वहं लब्धालोकः कथमनया मृगतृष्णया वंचितः तस्यैव पुनः पुनः प्रदीप्तस्य संसाराग्नेरात्मानमिंधनीकुर्या
मिति स्वस्ति वः स्वप्नोपमेभ्यः कृपणप्रार्थनीयेभ्यः इत्येवं निश्चितमतिः समाधिं भावयेत् संगेयाति स्मये
कृतकृत्यत्वममस्य योगसिद्धिः ततो योगभ्रष्टस्य पुनः संसारस्यानिष्टस्य प्रसंगात् संगस्मययोरकरणेनैव
स्य विघ्ननिरासोपाय इत्यर्थः पूर्वं बुद्धिप्रतिबिंबितपुरुषस्य स्वार्थसंयमात्तारकं विवेकज्ञानं उक्तं तत्रोपायांत
रमाह क्षणतत्क्रमयोः संयमाद्विवेकजं ज्ञानं ५२ अभेद्यः कालभागः मतः क्षणः अन्ये मुहूर्त्तादयः कालभा
गाः क्षणसमूहरूपाः असत्याः न हि क्षणानां समूहो वस्तुसन् तत्रायमस्मात्पूर्वः क्षणः अयमुत्तरः क्षण इति क्ष
णानां तेषां क्रमस्य पौर्वापर्यस्य च संयमात् इति सूक्ष्माणां भेदसूक्ष्मसाक्षात्कारे विवेकी भवति तेन च युगपद्विपरा
शीनां पुरुषाणां ज्ञानं साक्षात्कारात्मकं जायते इत्यर्थः इदं क्षणसंयमजं ज्ञानं सर्वविषयमित्यग्रे वक्ष्यते संप्र
ति सूक्ष्मं तस्य विषयविशेषमाह जातिलक्षणदेशैरन्यतानवच्छेदात्तुल्ययोस्ततः प्रतिपत्तिः ५३ अवच्छेदो

यो॰ वृ॰
३७

लेनिश्चयः लोकेहिभावानांत्रयोभेदनिश्चयहेतवः तत्रदेशेनलक्षणेनचतुल्ययोर्गोगवयोर्जात्याभेदधीः देश
जातिभ्यांतुल्ययोर्गवोः कृष्णश्वेतादिलक्षणेनभेदधीः जातिलक्षणाभ्यांतुल्ययोः आमलकयोः पूर्वोत्तरादिदे
शभेदाद्भेदनिश्चयः यदापुनर्योगिनोज्ञानपरीक्षार्थंकेनचित्पूर्वदेशस्थमामलकमुत्तरामलकदेशेविन्यस्यो
त्तरामलकंपूर्वदेशेविन्यस्तमन्यासक्तेयोगिनितदातयोरामलकयोरामलकत्वजात्यास्वपरिमाणादिल
क्षणेनदेशेनचतुल्ययोर्जात्यादिभिरन्यत्वनिश्चयासंभवात् ततः क्षणसंयमजविवेकज्ञानाद्वास्तवप्र
तिपत्तिर्योगिनोभवति यस्मिन्क्षणेपूर्वामलकमुत्रएवविन्यस्तंतस्मात्प्राचीनक्षणोपेतस्मिन्पूर्वदेशा
स्यतत्रयपरिणाममालाजातानोत्तरामलकेतस्यतेषुक्षणेषुजातत्वपरिणाममालावत्वात्तथाक्षणक्र
मज्ञोयोगीतयोः पूर्वोत्तरत्वपरिणाममालाक्षणाभ्योस्यक्षणस्यानंतर्यंजानन्नधुनेदमुत्तरमिति·प्राक्पूर्वं
नोत्तरमितिभेदंनिश्चिनोतीत्यर्थः तारकंसर्वविषयंसर्वथाविषयमक्रमंचेतिविवेकजंज्ञानं ५४ यत्पूर्वोक्त
संयमात्सर्वंज्ञेतेनोत्क्रामसाप्रकारंभावविषयायपारसंवसानिष्पन्नैः सर्वैः अन्नंभुक्तमितिसर्वैर्व्यंजनम
कोभुक्तमितिगम्यते तथयथापुनःपात्रस्थैः सर्वैर्जनैरुपनीतंसर्वमन्नंभुक्तमित्युक्तेस्वरूपतः प्रकार

राम·
३७

तश्चानिःशेषंभुक्तमितिगम्यतेतद्वदिदंक्षणसंयमजंविवेकज्ञानंसर्ववस्तुस्वरूपविषयंसर्वथाविषयंसर्वप्रका
रविषयंप्रवृत्तत्वादगाधात्संसारसागरात्तारयतीतितारकसंज्ञकमक्रमंयुगपदेवकरतलामलकव
त्सर्वंसमूहावलंबनमित्यर्थः एवंविवेकख्यातिकाष्ठाऽवधिकानंतरंहिभूतिफलान्संयमानुपन्यस्यता

रा

दशाविवेकख्यातिकाष्ठामुपागतानांसत्वपुरुषान्यताख्यातिसाक्षात्कारमात्रंमुक्तयेकल्पतइत्यभिप्रेत्याह सत्वपुरु
षयोः शुद्धिसाम्येकैवल्यमिति ५५ निरस्तसमस्तरजोमलस्यबुद्धिसत्वस्यविवेकख्यात्यासंस्कारशेषस्य।
सर्ववृत्तिशमनत्वंशुद्धिः पुरुषस्यापिनित्यशुद्धस्यतदाकलितभोगशून्यत्वंशुद्धिः एवंतयोः शुद्धिसाम्येसति।
कैवल्यंतत्रहिभूतयस्तुज्ञानोत्पादनार्थमुपन्यस्ताः कैवल्यंतुबुद्धिविलक्षणपुरुषात्मसाक्षात्कारमोक्षादविद्या
निवृत्तावनागतदुःखानुसारूपंसिध्यतीत्यर्थः इतिविभूतिपादः ३ सर्वसाधनसिद्धीनांयस्यास्त्सिद्धिरनुत्तमा
कैवल्यरूपातन्मात्रेशीलतांप्रनमाम्यहं प्रथमद्वितीयपादयोर्योगस्तत्साधनंप्रतिपादितं तृतीयेसंयमस्व
रूपमंतरंगत्वंसंयमस्यतत्त्वं·परिणामभेदाः सिद्धयश्चोक्ताः तत्रकाश्चिदतीतानागतज्ञानादिसिद्धयः श्र
द्धाद्वाराकैवल्ययोगस्यांगंकाश्चिद्विदिद्धिपजयार्थः साक्षादंगंतारकसंज्ञिविवेकज्ञानसिद्धिर्योगस्यफलमिति

यो.सू. निरूपितम् इदानीं कैवल्यस्वरूपं प्राधान्येन प्रतिपादनीयं तदर्थं कैवल्यभागीयं चित्तं परलोकः क्षणिक
३८ विज्ञानातिरिक्तात्मा चित्तविकारास्तस्यादिभोक्ता धर्ममेघश्च वक्तव्यः प्रासंगिकं चान्यदुक्तमपि इति चतुर्थःपा
दश्चारभ्यते तत्र प्रथमं सिद्धचित्तेषु कैवल्ययोग्यं चित्तं वक्तुकामः पूर्वोक्तसिद्धीनां हेतुभेदात्पंचविधत्वमाह
जन्मौषधिमंत्रतपःसमाधिजाःसिद्धयः १ जन्मना सिद्धिः कपिलादीनां सा सांसिद्धिकीत्युच्यते औषधि
विशेषसेवया माण्डव्यादीनां मंत्रजपेन केषांचिदणिमादिसिद्धिः तपसा विश्वामित्रादीनां सिद्धिः एताश्च
तस्त्रः सिद्धयः पूर्वजन्माभ्यस्तयोगजा एव जन्मादिनिमित्तेन व्यज्यंते अत एव योगाभ्यासे विश्वासेन प्रवृ
त्तिः इह सिद्ध्यदर्शनेपि जन्मान्तरे साफल्यात् समाधिजास्तु पूर्वपादे व्याख्याताः ननु तपःप्रभावादिदेव नं
दीश्वरस्य श्रीगौरीशंकरप्रसादात्स्वीयेन देवशरीरपरिणामः अपरेतत्र न तावदयं नरदेहो देवादिदेहस्यो एम.
पादानं तस्मिन्स्थिते परिणामोनतरायोगात्तपस्याहेतुत्वात् नापि तदवयवा एवोपादानं नरदेहमात्रहे ३८
तो विलक्षणकार्यकारित्वायोगादित्याशंक्याह जात्यंतरपरिणामः प्रकृत्यापूरात् २ प्रधानादयः पृथिव्यं
ताः प्रकृतयः तासां सर्वत्र सत्त्वान्नरादिदेहावयवेषु तासामापूरणं धर्मादिनिमित्तानुरोधेनावयवानुप्रवेशेन

जात्यंतरपरिणामो युज्यते यथाग्निकणस्य प्रकृत्यनुग्रहात्तृणादौ बहुतरणादिमंडलमापिलेनेत्यर्थः।
ननु प्रकृत्यापूरे धर्मादिनिमित्तमपेक्ष्यते न वा न चेत्सर्वत्रापूरणप्रसक्तिः नाद्यः धर्मादेः प्रवर्तकत्वे पुरुषार्थः प्रवर्त्त
कइति सिद्धान्तविरोधादित्यत आह निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत् ३ निरी
श्वरसांख्ये हि पुरुषार्थ एवानागतः प्रकृतीनां प्रवर्तकः अस्माकं तु सेश्वराणां तदुद्देशेनेश्वरः प्रवर्तकः र
स्तूद्देश्यतया पुरुषार्थः प्रवर्तक उच्यते निमित्तं तु तासां न प्रवर्तकं तत्कार्यत्वात् किंतु ततो निमित्ताद्वरण
स्य प्रतिबंधस्य बाधो भवति धर्मेणाधर्मनिरासे प्रकृतयः स्वयमेव देवादिपरिणामेन प्रवर्त्तन्ते पापाधिक्ये
न पुण्यप्रतिबंधे सति तिर्यगादिपरिणामो यथा नहुषस्य सर्पपरिणामः अत्र दृष्टान्तमाह क्षेत्रिकवदिति
यथा क्षेत्रिकः कृषीवलो जलस्यान्यत्र देशाद्वरणभेदनमात्रं करोति ततो जलं स्वयमेव केदारान्तरे प्रवर्त्त
नेन दृष्टिमर्थः ननु यदा योगी युगपद्भोगार्थं बहून्कायान्निर्मिमीते तदा तेषु चित्तानि कुतो भवंतीत्याह नि
र्माणचित्तान्यस्मितामात्रात् ४ योगप्रभावान्निर्मीयंते इति निर्माणानि चित्तानि योगिन एकस्याधीनमह
स्मापूरणकायवदहंकारात्प्रकृतेर्जायंते इत्यर्थः नहि चित्तानां भिन्नभिन्नाभिप्रायत्वाद्योगिनो भोगसिद्धिः।

यो·सू·
३९

स्तत आह् प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषां ५ निर्मितचित्तानां योगी स्वभोगानुकूलप्रवृत्तिविशेषनिया।
मकं चित्तं निर्मिमीते योगबलात् तच्चित्तं तेषां नायकं भवति तेन भोगस्तत्रनुसंधाने युज्यते इत्यर्थः एवं जन्मादि
भिः पंचविधानि सिद्धचित्तान्युक्तानि तेष्वपवर्गभागी यच्चित्तं निर्द्धारयति तत्र ध्यानजमनाशयम् ६ तत्र तेषु
जन्मादिजेषु यत्समाधिजं तदनाशयं क्लेशवासनाशून्यं मोक्षयोग्यमित्यर्थः योगिनश्चित्तवत्कर्मापि विल
क्षणमित्याह् कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषां ७ वाङ्मनःसाध्यं सुखैकफलकं शुक्लं कर्म स्वाध्या
यतपःशीलानां भवति दुःखैकफलकं कर्म कृष्णं दुरात्मनां भवति सुखदुःखमिश्रफलकं च बहिःसाधनसा
ध्यं शुक्लकृष्णं सोमयागादिरतानां भवति तत्र व्रीह्यादिवधेन पिपीलिकादिपरपीडा उपाद्स्वर्णदानादिप
रानुग्रहेण च यागादिरं त्रिविधं कर्मेतरेषामयोगिनां भवति योगिनस्तु संन्यासिनो बाह्यसाधनसाध्यकर्मसा
गादशुक्लकृष्णं कर्म क्षीणक्लेशत्वात् अकृष्णं योगधर्मस्य फलमनभिसंधायेश्वरार्पितत्वात् अशुक्लं कर्मास्ति
अतश्चित्तशुद्धिविवेकख्यातिद्वारेण मोक्षैकफलकमशुक्लकृष्णं योगिनः कर्म इत्यर्थः कर्मणः प्रसंगाद्वासना
भिव्यक्तिफलमाह् ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानां ८ ततस्त्रिविधात्कर्मणो मरणकाला

एम·
३९

नंतरं जात्यायुर्भोगरूपविपाकदानापन्नस्य विपाकस्यानुगुणानां वासनानामभिव्यक्तिर्भवति न विरुद्धानां।
मित्यर्थः देवत्वप्राप्तौ विपाके प्रसक्ता एव न नरकभोगवासना भवंति तासामभिव्यक्तौ दिव्यभोगायोगादिति भा
वः ननु स्वर्गादेशादेव जन्मनि जातानां तत्र भोगेभ्यो वासनाः कथं पुनर्व्याघ्रादिजन्ममरणव्यवधानानंतरं पुन
रेव जन्मन्यभिव्यज्यंते अनेन पूर्वजन्मवासना एव पूर्वदिनवासनावत्कुतो न व्यज्यंते इत्यत आह जातिदे
शकालव्यवहितानामप्यानंतर्यं स्मृतिसंस्कारयोरेकरूपत्वात् ९ यद्यपि सुप्तोत्थितस्यानंतरं पूर्वदि
नानुभवजवासनाः प्रायेणाभिव्यज्यंते अव्यवधानात् तथाप्यनादिसंसारे येन कर्मणा यज्जन्मनि भो
गवासनाः संचिताः तासां जन्मकोट्यादेशेन कल्पशतेन च व्यवहितानामपि तज्जातीयेन कर्मणा तज्ज
न्मनि पुनः प्राप्ते सति तेनैव कर्मणा जन्मना वाभिव्यक्तानामानंतर्यमव्यवहितत्वं स्मृतिद्वारा भोगादि
हेतुत्वमिति यावत् विजातीयकर्मारब्धानंतरपूर्वजन्मवासनानां व्यंजकाभावात् प्रसुप्तिरेव व्यवहिता
नामपि कर्मजन्मनोरभिव्यंजकयोः सत्त्वादभिव्यक्तिर्युक्ता न च विजातीयत्वेप्यव्यवधानादनंतरपूर्ववास
नाएवताभ्यांस्मसाधर्म्यमभिव्यज्यंतामिति वाच्यं स्मृतिसंस्कारयोरेकरूपत्वादयमर्थः क्रियाज्ञानमन्म

यो.सू.
५०

ह्यरण्यादिकं शक्त्यात्मना स्थितः संस्कारः स च स्वसमानविषयक्रियास्मृत्यादिरेतु क्रियासंस्कारः क्रियात्मना
ता न संस्कारः स्मृत्यात्मनाः स्मृसंस्कारो स्मात्मनापरिणमत इति यावत् एवं स्मृतिसंस्कारयोरभेदेनैकविषय
त्वेनैकरूपत्वात् आनंतर्यशक्तिः कार्यकारणभावो न विजातीययोः न ह्यम्रवधाने संस्कारस्य विरूप
कार्यकारित्वं आपादयति यथानुभवत्तसंस्कारादनंतरमननुभूतस्मृत्यापत्तेरिति न तु जन्मांतरितत्वा
सनाः न संतीति वृद्धं तं वा वार्कमस्माद् तासामनादित्वं चाशिषो नित्यत्वात् १० न केवलं तासां वासनाना
आनंतर्यं किंत्वनादित्वमपीति चार्थः कुतः सदा हि भूयासमित्याशिषो मरणत्रासस्य नित्यत्वात्सर्वजंतुषु
अभिचारादिरूपर्थः इदमत्राकूतं जातमात्रस्य कंपादिनानुमितो मरणत्रासो द्वेषदुःखस्मृतिमभिचाराक
स्य पतिसा च वासनानामपि मरणे न दुःखानुभवे सो अस्मिन्जन्मन्यसंभाव्यमानो जन्मांतरैकस्यपतीत्यनादि
त्वसिद्धिरिति ननु देहस्यानात्मत्वे कस्य जन्ममरणत्रासः आत्मनोऽनाद्यन्तस्याभयत्वादिति चेत् चित्तस्य
त्रिक्रमः तस्यैव चानादिवासनानुविद्धस्य चित्तस्याहंकारिकत्वेन विभुनस्तत्तद्देहसंकोचविकाशशीलवृत्ति
लाभो जन्म तस्य परामो मरणं तत्काले दुःखमित्यादिसर्वसंसारः नन्वनादिवासनानां कथमुच्छेदस्तत्राह हेतु

एम
५०

फलाश्रयालंबनैः संगृहीतत्वादेषामभावे तदभावः ११ नैताः प्रत्यक्षवदनादयः किंतु कार्यकारणप्रवाहेणानादयः
अतः कारणोच्छेदादुच्छेदसंभवः तथाहि पूर्वपूर्वभ्रमसंस्कारलक्षणाविद्याहमित्यस्मिताहेतुः सा च रागं
मेदमनिष्टमिति भ्रमहेतुः सोपि रागद्वेषयोः तौ च परनिग्रहादिद्वारा धर्माधर्मयोः तौ च भोगे सोपि वासनो
मुनाः पुनर्जन्मादिष्वित्यनादिसंसारचक्रमनिशमावर्तते तत्र वासनानां क्लेशाः कर्माणि हेतवः देहादयो भो
गाः फलं चित्तमाश्रयः शब्दादिकमालंबनमेतैः संगृहीतत्वादेषां क्रियायोगाष्टांगयोगज्ञानविरक्तिविवेक
ख्यात्या उच्छेदे इत्यनिवासनानामभावरूच्छेदो भवतीत्यर्थः ननु सतां संस्काराणां कथमभाव इत्यत्राह
अतीतानागतं स्वरूपतोऽस्त्यध्वभेदाद्धर्माणाम् १२ नात्यन्तमसतामुत्पत्तिर्न सतां विनाशः नासतो विद्यते भावो ना
भावो विद्यते सत इति परमेश्वरगीतासु च वेदाहं समतीतानि वर्तमानानि चार्जुन भविष्याणि च भूतानी
ति वर्तमानवदतीतानागतमस्य सत्त्वे घटते अन्यथासतः सत्त्वे घटते संभवति तस्मादतीतानाग
ते धर्मजातं धर्मिणि प्राक्तिरूपेणास्ते वृत्पत्तिरिणामत्रयसंयमादिना योगिनः साक्षात्कुर्वंति कुलालादय
अनुद्भवावाविर्भावं कुर्वन्ति परं न्वयी धर्मीणि स्थिर एक उक्तः ननु न हि वासनादिवधमत्वान्नत्त्तानवैपर्यमिति वे

न्त धर्माणामनागताद्यध्वनो भेदाद्वर्त्तमानाध्वनि हि दुःखादिवासना चित्ते साधिकाराऽसंख्येयपरिणाम-
शीले चित्ते भोग्यतामापन्ना बंध उच्यते तत्त्वज्ञानेन तु निरधिकारमतीताध्वनि प्रवेशितं प्रकृत्यात्मना सद-
पि पुनरस्यानबीजस्य कर्त्तृत्वमपुरुषार्थस्य कृतत्वान्न पुनरावर्त्तत इत्यर्थः अतीतानागतं स्वरूपतोऽस्त्यु-
क्तं तत्र तत्किंस्वरूपमित्यत आह ते व्यक्तसूक्ष्मा गुणात्मानः १३ व्यक्ता वर्त्तमानाध्वानः सूक्ष्मा अतीताना-
गताध्वानः ते महदादयो घटादिविशेषान्ताः गुणात्मानः सत्त्वरजस्तमःस्वरूपा इत्यर्थः सर्वे भावाः सुखदुः-
खमोहात्मकगुणान्वितत्वेन तत्प्रकृतित्वात्तत्स्वरूपा एव यथा घटादयो मृदन्विता मृत्स्वरूपाः प्रकृतिविका-
रयोर्भेदाभेदरूपतादात्म्यात्तत्र गुणाः परिणामिनित्याः अन्ये सर्वे भावाः प्रतिक्षणपरिणामाः क्षणवि-
ध्वंसिनः पुरुषस्तु कूटस्थः तदुक्तं भाष्ये गुणानां परमं रूपं न दृष्टिपथमृच्छति यत्तु दृष्टिपथं प्राप्तं तन्माये-
व सुतुच्छकमिति इंद्रजालिकवत्क्षणविध्वंसीत्यर्थः ननु यदि त्रयो गुणाः परिणामिनः तर्हि परिणामाना-
मन्येकमेकत्वेन स्यात् नत्रिसत्त्वं तु दुग्धानामेकः परिणामो दृष्ट इत्यत आह परिणामैकत्वाद्वस्तुतत्त्वं १४
बहूनामप्येकः परिणामो दृष्टः यथा रुमास्थले क्षिप्तानां गजाश्वादीनामेकोलवणपरिणामः वर्त्तितैलाग्नी-

---

नामेकोदीपपरिणामः सत्त्वादीनां त्वंगांगित्वाभावात्परिणामैकत्वं गुणानां तु परिणामस्यांगांगिभा-
वस्यैकत्वाद्वस्तुनो महदादेस्तत्त्वमेकत्वमुच्यते तत्र सत्त्वस्यांगित्वे गुणत्रयादेको महान् तस्मादेकस्माद्रजः-
प्रधानादहंकारः तमःप्रधानाच्च तन्मात्राणि प्रत्येकमेकत्ववंति भवंति अहंकारात्सात्त्विकाद्बुद्धींद्रिया-
णि राजसात्कर्मेंद्रियाणि उभयात्मकान्मनः एवं शब्दतन्मात्रस्यांगित्वे सत्याकाशः एवं तन्मात्राणामेकः
परिणामः स्पर्शरूपरसगंधतन्मात्राणां क्रमेणांगित्वे वाय्वग्न्यब्भूवनयः प्रत्येकं जायंते एकस्माद्रूपः प-
रिणामास्तु बहुपरिणामवासनारूपशक्तिवैचित्र्याद्विसंततिविस्तरेण ननु क्षणिकविज्ञानात्मकचित्ताति-
रिक्तं वस्तु नास्त्येव यस्मादेषां तद्विज्ञानाभिन्नत्वं यथा विज्ञानं प्रमेयाश्च घटादयः अतः कस्मिन्नेकत्वनानात्वचिंता
चित्तमेव वस्त्वनादिसमनंतरप्रत्ययात्मकवासनावैचित्र्याद्ग्राह्यग्रहणात्मनाभातीति वदंतं बौद्धं प्रत्याह वस्तु-
साम्येऽपि चित्तभेदात्तयोर्विभक्तः पंथाः १५ तयोः चित्तवस्तुनोर्विभक्तः पंथा भिन्नो मार्गः विज्ञानार्थयोर्भे-
दरभिधायत् कुतो वस्तुनः स्त्रीपिंडादेः साम्येऽपि विज्ञानभेदात् एकस्यां नार्यां यस्य सुखविज्ञानं सप-
त्न्याः दुःखविज्ञानं तदलाभे कामुकस्य मोहो द्विषादस्य तिरस्कारविज्ञानं निष्कामस्योपेक्षाविज्ञानं सर्वेषां पात्वपार

ह्यासामग्र्याधिरूढस्य बाधितभ्रमस्य भिन्नज्ञानानामेकं वस्त्वनेकचित्तानमिति तयोर्भेदः यदेकं तदनेकेभ्यो भिन्नं यथा नीलत्वज्ञानेभ्यः एकं च वस्त्वतः स्वगोचरानेकचित्तानेभ्यो भिन्नं न च प्रमेयस्य प्रमेयसंप्रयुक्तं एकत्वे विषयविषयित्वविरोधाद्ग्राह्याभावे चित्तानां नानानीलपीताद्याकारत्वायोगाच्च न च प्रमेयात्मकवासनातन्त्रहेतुरिति वाच्यं न शक्या हेतुत्वात् नचैकरूपाद्रूपान्तरकल्पं चित्तवैचित्र्यमिति वाच्यं अर्थस्य त्रिगुणत्वाद्धर्माविघाते स्वपार्थगतानां सत्त्वरजस्तमसामुद्रेकात् सुखदुःखमोहचित्तानहेतुत्वेन तत्तज्ज्ञानापेक्षया गुणानां साम्यादुपेक्षाहेतुत्वमिति पृथक्त्वात्तस्माद्वृत्तिचित्तानामतिरिक्तोऽर्थः यत्तु कश्चिदाह अस्तु चित्तानां समोऽर्थः स तु ज्ञानरूपाहि ज्ञानग्राह्यः प्रातिभासिको नानाज्ञानोऽस्तीति एवं कथ्यः कुतस्तस्य सामग्रीरिति ग्राहकचित्तानां चित्ताद्भिन्नवत् किमेकचैत्रचित्तस्य घटवस्तु कार्यं उत चैत्रमैत्राद्यनेकचित्तानां नानाघ इत्याह नचैकचित्ततन्त्रं वस्तु तदप्रमाणकं तदा किं स्यात् १६ यद्येकचित्तस्य कार्यं घटवस्तु तदा तस्मिंश्चित्ते मदादिव्यग्रे तद्वस्तु प्रमाणकं किन्नष्टस्यादिसम्पर्कः न चेष्टापत्तिः पुनस्तद्दृष्टेन सोपमितस्य बाधितभ्रमस्य भिन्नज्ञानानामेकस्य व्यग्रत्वेऽप्यन्येन दृष्टप्रमानत्वाच्च तस्मान्नैकचित्ततन्त्रं वस्तु नाप्यनेकचित्ततन्त्रं प्रातिभासिकस्य सर्वदैकचित्ततन्त्रत्वनियमात्सर्वमेकेन दृष्टप्रमा

नेघटेवस्तुचित्तैः पश्चात्संबंधे चित्तस्य कारणघटांतरेऽस्मिन्नियमसंगात्सामग्रीवैकल्यस्यापात् किंचोद्भटदर्शनकाले दृष्टभानानात्वीस्यदर्शमपि न स्यात् तस्मान्न प्रातिभासिकं वस्तु किंतु चित्तातिरिक्तं सत्तत्त्वमिति सिद्धे नु सिद्धं ते विभुनश्चित्तस्य सर्वसंबंधात् सदा सर्वज्ञानापत्तेस्तत्राह तदुपरागापेक्षित्वाच्चित्तस्य वस्तु ज्ञाताज्ञातं १७ यद्यप्याहंकारिकत्वाच्चित्तेन्द्रियाणि विभूनि तथापि तेषामहंकारस्थानां संबंधो विषयस्य स्फूर्तौ न हेतुः किंतु कर्मणाभिव्यक्तानां देहस्थानां तथा चेन्द्रियद्वारेण यन्नार्थेन चित्तस्योपरागः तस्मिन्नर्थे चित्तस्येमिष्टवित्त्वं। ते चिद्रूपास्फूर्तिं धत्ते तन्मर्यैस्त्वाकारवृत्तिद्वारेण बुद्धिस्थप्रतिबिंबद्वारा पुरुषश्चेतयते नान्यमिति वस्तु ज्ञाताज्ञातं भवति अत एव चित्तं तत्तदर्थोपरागमपेक्ष्य कदाचिद्वस्तुना नानिकराचित्तेनिज्ञाताज्ञातविषयत्वात्सपरिणामीति भावः तर्ह्यात्मनोऽपि परिणामित्वमित्यत आह सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामात् १८ पुरुषस्य हि चित्तं प्रमाणादिसर्ववृत्तिकं चित्तं विषयः स यदि चित्तेन स्वविषयघटादिवत् पुरुषेण स्वसमाकालेन ज्ञायेत तदा चित्तवत्परिणामी स्यात्पुरुषः वृत्तिपरिणामं तत्तदाकारमपेक्ष्य तज्ज्ञातत्वापातात् नदा। किंपरिणामिरूपेणेति चिन्त्यात्स्य पुरुषो न स्यात् सदैव तु स्वसत्ताकाले ज्ञायमानाश्चित्तवृत्तयो भोग्याः प्राचाघा

कारणः तस्य भोग्यस्य भोक्तुरपरिणामित्वं ता यपंति साक्षिणः परिणामित्वादेव हि स्युः सदाज्ञाता।
भवंति नाम्पथेत्यर्थः ननु चित्तमेव साक्षिकं स्वप्रकाशं स्वस्यापयोभयोः प्रकाशकमस्तु किं साक्षिणा इत्यत आह न
तत्स्वाभासं दृश्यत्वात् १९ रूपाद्यवदितिवत् मुख्यहेतुदृष्टांतं मे मन इति दृश्यत्वाच्चित्तं स्वभासं स्वप्रका
शं न भवतीत्यर्थः अयं भावः किमिदं स्वप्रकाशत्वेन तावत् स्वाभिन्नप्रकाशक्रियाकर्मत्वं क्रियाकर्मणोरे
कत्वायोगात् न द्वितीय निर्गम्यते किंतु यामः नापि पुरुषवित्तेः चित्तस्य स्वभिन्नप्रकाशाविषयत्वं कुड्यमेव न दृस
नुभवविषयत्वादृष्टो दृश्यत्वात् स्वातिरिक्तदृष्टृकं चित्तं सोहमिति प्रत्यभिज्ञानात् स्वातिरिक्तमिति किंच एक
समये चोभयानवधारणं २० साक्षिकत्वादेन एकस्मिन्नेव क्षणे चित्तचैत्ययोरुभयोरवधारणं न संभवती
त्यर्थः तथाहि घटमहमद्राक्षमिति चित्तार्थयोः स्मरणात् तयोरनुभवजन्यं तत्र चित्तस्फुरणं तयोः कथमनुभ
वः न च चित्तमेवोभयोरनुभव इति वाच्यं अर्थस्य चित्तजन्यत्वेऽर्थस्फुरणे चित्ताभासत्वात् जन्यत्वेन तत्समकालत्वे
पि तदुत्पन्नं तादात्म्ययोरभावेन तद्ग्राहकत्वायोगात् असंबद्धग्राहकत्वे चित्तस्य सर्वज्ञतापत्तिः उक्तं हि योग
तैः अनंतरुत्पत्तिरतत्तादात्म्याच्च तेन न गृह्यते इति न चासिद्धं स्वानुभवं दृश्यत्वादित्युक्तं नापि चित्तं स्वस्यापयोरनु

भवरूपं अतिसाक्षिकस्योसन्निकृष्टातिरिक्तव्यापाराभावात् उक्तं हि भवति यथा क्रियासिद्धकारकं सैव चोभतेर
ति नैवैकस्या व्यापाराभेदं विना कार्यभेदो युक्तः न वा स्वप्रेतानंतेयेन युगपत्वानुपपत्तेः तस्मात्साक्षिणो वचि
त्तं चैतयोरनुभव इति सिद्धं ननु मास्तु चित्तं स्वदृश्यं चित्तांतरेण दृश्यतां किं साक्षिणेत्यत आह चित्तांतरदृश्य
त्वे बुद्धिबुद्धेरतिप्रसंगः स्मृतिसंकरश्च २१ यदि नीलाकारं चित्तं चित्तांतरेण दृश्यं तदा तदपि बुद्धिरूपं चित्तमप
पावुद्धासाप्यपरेणेत्यनवस्थापाता न न च बुद्धिज्ञाति व तु एव चैव च्छिन्नतात्मानो ग्राह्याद्य इति ना न वस्थेति वाच्यं ग्रा
हकचित्तस्यानिश्चये ग्राह्यचित्तानिश्चयात् मेरैघटो दृष्टो न वेति संशये न दृष्ट इति अतिरेकनिश्चये चार्थेति
श्चयादर्शनेन तत्तानचित्तानिश्चयस्यार्थानिश्चयहेतुत्वात् तत्र दर्शने तचित्तानामनुभवे चानेन चित्तस्मृतीनां स
कः श्चयाप्रोतिस्मृत्यानस्यात् दृष्टा नसग्राहकत्वात् ग्राहकाभावाच्चेयं नीलचित्तस्मृतिरियं पीतचित्तस्मृतिरिति वि
भागो न स्यादित्यर्थः चित्तानां समतान्हीयामामिव ग्राह्यग्राहकत्वासंभवश्च अतः साक्षिवेद्यं चित्तमिति सिद्धं
ननु कूटस्थस्य साक्षिणश्चित्तेन क्रियापूर्वकसंबंधाभावात् तेन कथं संवेद्यमित्यत आह चितेरप्रतिसंक्रमायाः
तदाकारापत्तौ स्वबुद्धिसंवेदनं २२ यथा बुद्धेः क्रियया घटादिसंश्लेषः प्रतिसंक्रमोऽस्ति परिणामित्वान्न तथा

च्चितेर्बुद्धौप्रतिसंक्रमः अपरिणामित्वात् किंतुसूर्यस्यजलेप्रतिबिंबवच्चितेर्बुद्धौप्रतिबिंबेसतिबुद्धेश्चि॰
दाकारतापत्तौ स्वस्यभोग्यतायाबुद्धेःसंवेदनंभवतिचिच्छायापन्नायास्तत्संबंधेनचिदुपरक्तेचित्तेचिद्रूपमिव
र्थः अप्रतिसंक्रमायाश्चितेःसान्निध्यात्तस्याश्चितेराकारश्छायायत्ततदाकारापत्तौ सत्यांस्वभोग्यबुद्धिसंवेद
नमितियोजनातत्रयदिचित्तातिरिक्तआत्मास्तितर्हिकथंकेषांचित्चित्तमेवात्मेतिभ्रमस्तस्याशंक्याचित्तस्य
सर्वार्थग्रहणसामर्थ्यंतेषांभ्रमबीजमाह द्रष्टृदृश्योपरक्तंचित्तंसर्वार्थं २३ द्रष्टापुरुषस्तेनतः दृश्यंपरत्वा
घचेतनमितितत्संवेदनाचेतनमर्थोविषयोपस्यतत्सर्वार्थंतत्रतत्सान्निध्याच्चिद्रूपतामिवप्राप्तंद्रष्ट्
चिदुपरक्तंदृश्यविषयंभवति इंद्रियादिद्वारेणदृश्योपरक्तंतदाकारंभवतितथाचभोग्यरूपोव्याघाकारंसुखदु
खादिपरिणामलक्षणंभोग्यात्मकंदृश्यमपिचित्तेचित्स्थितिबिंबाभेदादात्मेतिभ्रमः सौगतानांयुक्तंवि
त्तस्यजपाकुसुमाद्यर्थाकारग्रहणीत्वाभिजातस्फटिकमणिकल्पस्यदृश्याकारग्राहित्वाच्चित्तातिरिक्तार्थो
नास्तीतिविज्ञानवादिनांभ्रमः अत्रेस्वविवेकः चित्तस्यभोग्यत्वाद्भोक्तास्य स्वीकर्तव्यः सनित्योदिताचिच्छक्ति
रित्युच्यते। द्विधाचिच्छक्तिः नित्योदिताऽभिव्यंग्याचेतितत्रनित्योदितापाः कूटस्थचिच्छक्तिः चित्तसत्वाभिव्यंग्याचि

त्प्रतिबिंबरूपासुखादिसारूप्यमापन्नाचिच्छक्तिर्भोगइत्युच्यते सहिद्विविधश्चभोगःचिदवसानतारूपएकःपरि
णामलक्षणोपरः तत्राभिव्यंग्याचिच्छक्तिरेवपुरुषस्यभोगः अपरःसुखादिपरिणामोबुद्धेःसाप्रचेतन्यापा
रश्चिद्रूपंबुद्धिपुरुषांतरविविक्तविधूतसमस्तमलजालेनिश्चलप्रदीपशिखाकारंसमाहितंप्रशांतत्वादि
चित्तंपुरुषसन्निधिश्चिन्तोत्तोतितात्पर्यं इतश्चचित्तादन्योभोक्तास्तीत्याह तदसंख्येयवासनाभिश्चित्रमपिप
रार्थंसंहत्यकारित्वात् २४ यद्यपिक्लेशकर्मविपाकवासनाभिरनंताभिश्चित्रंसुखाद्यप्रपत्तयाभोक्तृकंसे
चित्तंतथापिपरस्यनिरुपचरितचित्स्वभावस्यार्थैभोगापवर्गौसाधयतीतिपरार्थंभोग्यमेवनभोक्तेतियाव
तक्कुतः संहत्यदेहेंद्रियादिसहकारिभिर्मिलित्वाभोगादिकार्यकारित्वात् यन्मिलित्वाकार्यकारितत्परार्थंय
थागृहादिनहितभादिभिःसंहत्यगृहेस्वस्यवसतिंकरोति किंतुपरस्मैविप्रमित्रायएवंगुणाअपिचश्चादि
केपरार्थंकुर्वंतीतियुक्तं अतएवपुरुषशेषत्वाद्गुणाउच्यंते तथाचसत्वादयःपरार्थाःसंहत्यकारित्वाद्गृहवदि
त्यस्यहेतोःपक्षधर्मताबलाद्गुणेभ्योऽसंहतः अह्रोनिष्कलःस्वार्थःसिध्यन्नात्रपरःसिध्यतियोयस्यभोक्तासतेना
संहतोयथागृहस्वामीतिआंतेः गुणभोक्तुरपिपरार्थत्वेऽनवस्थानात्सहंषात्नपरंकिंचिदितिश्रुतेश्च तस्मा

यो॰ वृ॰ घस्य भोगापवर्गौ गुणा मम बुध्याकर्त्तव्यौ सुखदुःखाभ्यां योनुकूलनीयः प्रतिकूलनीयश्च स भोक्तात्मेति सि
४५ द्धं २४ इयता सूत्रजालेन जन्मादिसिद्धिचित्तेषु मोक्षयोग्यं चित्तं निर्धार्य कर्मवासनाप्रपंचं पूर्वकं विज्ञानभि
न्नार्थसाधनेन परलोकादिप्रपंचं च पारलौकिकं च भोक्तारं निरधारयत् अधुना कैवल्यं निरूपयितुं तद्योग्यमधि
कारिणं दर्शयति विशेषदर्शिन आत्मभावभावनाविनिवृत्तिः २५ पूर्वमुक्ततत्वात्मस्वाधिस्तु रूपयोरय
स्यात्मभावे तत्त्वभावना जिज्ञासा भवति काहं कस्मात् कुतो वेति तस्याधिकारिणः पूर्वोक्तविवेकेन बुद्धेरन्य
श्चिन्मात्रः पुरुषोहमिति विशेषदर्शिनः तत्त्वजिज्ञासा विनिवर्त्तते इच्छायाः स्वविषयलाभनिवर्त्तत्वात् यस्य
तु नास्तिकस्येहाहु दुर्बुद्धेर्यो मो भोक्ता नास्तीत्यनात्मन्यात्मभावनास्ति सो नाधिकारी यस्तत्त्वजिज्ञासुः सोधि
कारीति भावः २५ ननु तत्त्वजिज्ञासोर्विशेषदर्शनानंतरं कीदृशं चित्तमित्यत आह तदा विवेकनिम्नं कैवल्य एम॰
प्राग्भारं चित्तं २६ पूर्वं बुध्यादावात्मभ्रमदशायां यच्चित्तं विषयनिम्नं संसारप्राग्भारमासीत् तदिदानीं नि ४५
वृत्तभ्रमस्य योगिनश्चित्तं विवेकनिम्नं दृग्दृश्ययोर्भेदो विवेको निम्नमालंबनभूमिर्यस्य तद्विवेकनिम्नमिति
यावत् अत एव कैवल्यप्राग्भारोऽवधिर्यस्य तत्तथा कैवल्यप्राग्भारं कैवल्यफलावसानं धर्ममेघाख्यध्यानं तेभव

तीत्यर्थः २६ नन्वीदृशस्य चित्तस्याहं ममेति व्युत्थानप्रत्ययाः कुतो भवंतीत्यत आह तच्छिद्रेषु प्रत्ययान्तराणि
संस्कारेभ्यः २७ विवेकख्यातिरूपप्रसंख्यानपरस्यान्तःक्षीयमाणेभ्यो व्युत्थानसंस्कारेभ्यः प्रसंख्यानछिद्रे
ष्वभिव्यक्तेभ्यः प्रत्ययान्तराणि व्युत्थानरूपाणि भवंतीत्यर्थः २७ ननु सत्यपि प्रसंख्याने व्युत्थानसंस्काराः का
र्यायोन्निवृत्तिचेत् कस्तेषां हानोपाय इत्यत आह हानमेषां क्लेशवदुक्तं २८ यथाविद्यादयः क्लेशाः
क्रियायोगतनूकृताः तत्त्वस्मरलब्धप्रसराः प्रसंख्यानदहनदग्धाः पुनश्चित्ते संस्कारं न प्रसुवते एवं व्युत्था
नसंस्कारा अपि विवेकख्यात्यपरिपाकरूपायां प्रत्ययान्तराणि कुर्वाणाः परिपक्वप्रसंख्यानदहनदग्ध
बीजभावा अप्रसवधर्माणो भवंतीति क्लेशवदेतेषां हानमुक्तं वेदितव्यमित्यर्थः २८ एवं प्रसंख्यानेन व्यु
त्थानस्य निरोधमुक्त्वा प्रसंख्यानस्यापि निर्बीजयोगायैतस्य व्युत्थानरूपस्य निरोधोपायमाह प्रसंख्या
नेप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः २९ षड्विंशतितत्त्वान्यालोचयतः सत्त्वपुरुषान्यता
ख्यातिर्योजायते सर्वाधिष्ठातृत्वाद्यवान्तरफला तत्प्रसंख्यानेनत्राप्यकुसीदस्य कालिनेषु विषयेषु सीदती
ति कुसीदो रागः तद्रहितस्य सर्वात्मना विवेकख्यातिरेवसंततिरूपो धर्ममेघसंज्ञः समाधिर्भवति सर्वतत्व

क्लकृष्णं धर्मं कैवल्यफलं मेहति सिंचतीति धर्ममेघ इत्युच्यते प्रसंख्यानेवैराग्याद्धर्ममेघे सति परवैराग्योद
पात्प्रसंख्यानस्य निरोधो भवतीति भावः २९ इमं क्रमस्फुरयति ततः क्लेशकर्मनिवृत्तिः ३० ततो धर्ममेघात्
क्लेशानां पंचानां सवासनानां तन्मूलानां कर्मणां च निवृत्तिर्भवतीत्यर्थः ३० तदा सर्वावरणमलापेतस्य
ज्ञानस्यानंत्याज्ज्ञेयमल्पम् ३१ आवृणोति चित्तमिसावरणात्तमोमयाः क्लेशकर्मरूपा मलाः सर्वेति
आवरणाश्च मलाश्च सर्वावरणमलाः तैर्धर्ममेघध्यानेनापेतस्य ज्ञानस्य शुद्धस्यालोकस्यानंत्यात्ज्ञेयं
चेतनाऽचेतनात्मकं सर्वमल्पमेव भवति यथा शारदिऽभ्रशोषघनादिमलापेतेन भसि सर्वतः प्रद्योतमान
प्रचंडमार्तंडप्रकाशपटलस्य घटादयः प्रकाश्याः अल्पा भवंति तद्वत्संततनिर्मलस्य बुद्धिसत्त्वप्रकाशस्य कि
न्नाम यन्न गोचर इति भावः सेयं धर्ममेघस्य पराकाष्ठा दर्शिता अतएव धर्मानवधिमंत इति अमुमसास
र्वानेव ज्ञेयान्मेहति प्रकाशयतीत्यपि धर्ममेघ इत्याहुः अयमेव हि धर्ममेघपरिपाको ज्ञानप्रसादः करत
लीकृतामलकवत्सर्वं निर्दोषमपरोक्षीकुर्वन्निर्मलज्ञानात्मस्यान्निवजडाविभुरूपप्रकृतिविकारदूष
सिषयाः तद्गताशुद्धिविनाशाद्दोषान् प्रकटयन् चित्ततपस्विनो निर्बीजयोगाख्यानिधिमापादयन् परवै

राग्यमित्युच्यते ३१ नन्विदं परवैराग्यं क्लेशान्समूलकाषं कषत् कुशलाकुशलांश्च कर्माशयान्समूलघातं
निहंतुमुत्सहतां तथापि गुणानां सततः परिणामशीलत्वात् तादृशमपि पुरुषं प्रति देहेंद्रियादिपरिणाम
क्रमोनुवर्ततामिति तत्राह ततः कृतार्थानां परिणामक्रमसमाप्तिर्गुणानां ३२ ततो धर्ममेघफलीभूतपर
वैराग्यात्मकानंतज्ञानानेनेरगुणानां भोगविवेकख्यातिरूपपुरुषार्थकरणात्मोगमः परिणामानां महदा
दिघटांतानां सृष्टावानुलोम्येन प्रलये घटः पृथिव्यां लीयते पृथिव्यप्सु आपस्तेजसीत्यादि प्रातिलोम्येन च क्र
मश्चासीत् तस्य परिसमाप्तिरेव तत्पुरुषं प्रति गुणानां पुरुषार्थत्वाद्नागताध्वा हि पुरुषार्थो गुणानां प्रवर्त
कस्तस्मिन्कृते गुणानां स्वगतामपिख्यानुपपत्तेरिति भावः ३२ क्रमशब्दार्थमाह क्षणप्रतियोगी परि
णामापरांतनिर्ग्राह्यः ३३ क्षणाः कालांशास्तेषु समाहितबुद्धिनाक्रमोलेयः तत्र क्षणप्रतियोगी इति क
मस्वरूपनिर्देशः क्षणयोः पौर्वापर्यं क्रमः क्षणोऽप्रतियोगिनो निरूपको यस्य स क्षणप्रतियोगी एवं क्षणि
कपरिणामक्रमो मतः तत्र प्रमाणमाह परिणामापरांतनिर्ग्राह्य इति मृदादिपिंडघटकपालचूर्णक
णानां प्रत्यक्षपरिणामानां पूर्वांतः पिंडः अपरांतः कण इति पूर्वोत्तरावधिग्रहणेन क्रमो निश्चयेन ग्राह्यो भव

यो॰ वृ॰
४०

ति पिंडानंतरं घट इति क्रमो न प्रसक्तः क्वचित्सुरक्षितवस्त्रादेः पुराणतादर्शनेन पूर्वोत्तरनवत्वपरिणामक्रमा
रंभस्यसिद्धत्वात्पुराणतायाः सूक्ष्मतमसूक्ष्मतरसूक्ष्मस्थूलस्थूलतरस्थूलतमत्वेनज्ञायमानानांप्रभेदंज्ञा
त्वानवत्वानंतरंसूक्ष्मतमपुराणता तदनंतरंसूक्ष्मतरपुराणतेतिक्रमोनुमेयइत्यर्थः ननुयंक्रमः किमनि
त्येष्वेवास्ति उतनित्येष्वपीतिप्रश्ने अस्तिनित्येष्वपीतिवदामः तत्रनित्याद्विविधाः कूटस्थनित्याः पुरुषाः
परिणामिनित्याः गुणाः यस्मिन्धर्मिणिधर्मलक्षणावस्थाभिः परिणम्यमानेस्वरूपंनविहन्यते तस्य परि
णामिनित्यता तत्रानित्येषुबुद्ध्यादिषुधर्मिषुगुणादिपरिणामक्रमस्यपूर्वोत्तरभावेप्यपरांतः पुरुषसाक्षा
त्कारोस्तीतिक्रमः तेषुसावधिकः गुणेषुपरिणामिनित्येषुपरिणामक्रमो निरवधिकः मुक्तपुरुषान्प्रत्युप
रमेपिबद्धान्प्रत्यविच्छेदात् ननुसर्वेपुरुषामुच्यंतेनवा आद्येप्रधानेपरिणामः सावधिकः द्वितीयेतत्त्वज्ञाना
विश्रेधइति तत्राहुः सांख्याचार्याः अस्तित्रिविधः प्रश्नः एकांतवचनीयः विभज्यवचनीयः अवचनीयश्चे
ति तत्राद्यो यथाकिमयंसर्वोजातोमरिष्यतीतिप्रश्नः सएकांततोवक्तव्यः मरिष्यत्येवेतितथाकृतमस्तु द्वितीयः
सद्विभज्यवक्तव्यः यस्तत्त्वख्यातिः समुच्यते नान्यइतिएवंचजंतूनामानंत्यात्सुतरांदोषसर्गप्रलयानंतस्यच।

राम॰
४०

णात्त्वनसर्वमुक्तिः तृतीयस्तुप्रधानपरिणामक्रमः अकुशलस्यनेतिव्याकरणीयोयंप्रश्नइतितस्मात्समाप्यते
नवेतिप्रश्नः अयमुत्तरानर्हः अशक्यावधारणत्वात् यद्वा कुशलस्यांतवान्संसारक्रमः अकुशलस्यनेति
व्याकरणीयोयंप्रश्नइतितस्मात्सदापरिणामिषुनित्येषुगुणेषुक्रमवत्परिणामभेदादस्तिक्रमः कूटस्थ
नित्येषुपुरुषेषुबुद्ध्यादिपरिणामभेदारोपात्कल्पितः क्रमोनवास्तवइतिसर्वमवदातं ३३ अथगुणानामात्म
प्रतिपाद्ययोगफलंकैवल्यंसंदर्शयति पुरुषार्थशून्यानांगुणानांप्रतिप्रसवः कैवल्यंस्वरूपप्रतिष्ठावाचितिश
क्तिरिति ३४ कृतभोगापवर्गाणांकृतकृत्यानांबुद्ध्यादिगुणानांप्रतिप्रसवः कैवल्यंस्वरूपप्रतिष्ठावाचि
च्छक्तेः प्रातिलोम्येनप्रसवः उत्थानसमाधिपरवैराग्यसंस्कारामनसिलीयंते मनश्चास्मितायांली
यते सामहतिमहत्त्वंगुणेष्वितिप्रलयः तत्प्रधानस्यकैवल्यंपुरुषविशेषं उपचर्यते यद्वा चितिशक्ति
र्निःस्वभावापुरुषशक्तिः स्वरूपमात्रेणप्रकर्षेणतिष्ठतीति स्वरूपप्रतिष्ठापुनर्बुद्ध्यानर्पेनासंतिकवि
योगइतिभावः तदिदंपुरुषस्यनिःसंगस्यप्रकाशस्यकैवल्यमितिरमणीयंसोत्रइतिशब्दः शास्त्र
परिसमाप्तिदर्शनार्थः यदागमप्रमाणवत्प्रतिपत्तिदहनः स्फुटोत्तरपारदर्शीदंव्याख्यातंनिबोधदीयमवलेस

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

यो·म·
५८

तेतमःपारतम् प्रत्यस्तसमस्तकर्मनिलयेयोगान्तरंगंविनावेदैःसिद्धिभुवंतमीशमनिशंकैवल्यदंराघवं १
यन्नमस्कारलवकृतेमोक्षाद्याःसर्वसंपदःउमाधवंमहेशानंतंकाशीनिलयंभजे २ फणीन्द्रसूत्रसंबद्धा
व्यासभाष्यमणिभूषितामद्वाङ्मौक्तिकमालास्यात्सदाश्रीरामपादयोः ३ क्वाहंप्रमादजनितःक्षवात्से
संगुरोरिदं नूनंमहात्मनांदोषेनेक्षन्तेकृपान्विते इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्दा
नन्दभगवत्पूज्यपादशिष्यश्रीरामानन्दसरस्वतीकृतौसांख्यप्रवचनेयोगमणिप्रभायांकैवल्यपादश्च
तुर्थःसमाप्तः ॥